द्रो०

२२८

मारिष स एवं वाग्भिरुग्राभिस्तितस्तस्पुरुषर्षभः भीमसेनउवाच द्रुपदस्य कुले जातः सर्वास्त्रविषस्त्रवित्तमः कः क्षत्रि
यो मन्यमानः प्रेक्षेत तामवस्थितं पितृपुत्रवधं प्राप्य पुमान्कः परिहापयेत विशेषतस्तु शपथं शपित्वा राजसंसदि
एषवैश्वानराग्निवत्समिद्धः स्वेन तेजसा शराचापेंधनो द्रोणः क्षत्रं दहति तेजसा पुराकरोति निःशेषां पांडवानामनीकि
नीं स्थिताः पश्यत मे कर्म द्रोणमेव व्रजाम्यहं इत्युक्त्वा प्राविशत्क्रुद्धो द्रोणानीकं वृकोदरः दृष्टैः पूर्णायतोत्सृष्टैर्द्राव
यंस्तव वाहिनीं धृष्टद्युम्नोपि पांचाल्यः प्रविश्य महतीं चमूं आससाद रणे द्रोणं तदासीत्तुमुलं महत् २ नैव नस्तादृशं
युद्धं दृष्टपूर्वं न च श्रुतं यथा सूर्योदये राजन्समुसिंजो भवन्महान् संसक्तान्येव चादृश्यन्त्रथवृंदानि मारिष हतानि
वनिकीर्णानि शरीराणि शरीराणि केचिदन्यत्र गच्छंतः पथि चान्ये हयपद्रुताः विमुखाः पृष्ठतश्चान्ये ताड्यंते पार्श्वतोपरे
तथा संसक्तयुद्धं तदभवद्भृशदारुणं अथ संध्यागतः सूर्यः क्षणेन समपद्यत ॥ इति द्रोणपर्वणि विराटद्रुपदवधो रा
त्रियुद्धे समाप्ते संजयउवाच तेतथैवमहाराजदंशितारणमूर्द्धनि संध्यागतेसहस्रांशुमादित्यमुपतस्थिरे उदितेतसह

राम

२२८

६०

स्यांशेनतत्रकांचनसप्रभे प्रकाशितेपुलोकेषुपुनर्युद्धमवर्त्तत हृष्टानितत्रयान्यासन्संसक्तानिपुरोदयात् तान्येवाभ्युदितेसूर्येसम
सज्जंतभारत रथैर्हयाहयैर्नागाःपादातैश्चापिकुंजराः हयैर्हयाःसमाजग्मुःपदाताश्चपदातिभिः संसक्ताश्चवियुक्ताश्चयोधाःसंन्यप
तन्रणे तेरात्रौकृतकर्माणःश्रांताःसूर्यस्यतेजसा क्षुत्पिपासापरीतांगाःविसंज्ञाबहवोभवन् शंखभेरीमृदंगानांकुंजराणांचगर्जतां
विस्फारितविकृष्टानांकार्मुकाणांचकूजतां शब्दःसमभवद्राजन्दिविस्पृग्भरतर्षभ द्रवतांचपदातीनांशस्त्राणिपततामपि हया
नांहेषतांचापिरथानांचनिवर्त्ततां क्रोशतांगर्जतांचैवतदासीत्तुमुलोमहान् विवृद्धस्तुमुलःशब्दोद्यामगच्छन्महांस्तदा नानायुधनिकृ
त्तानांचेष्टतामातुरस्वनः भूमावश्रूयतमहांस्तदासीत्कृपणोमहत् पततांपात्यमानानांपत्त्यश्वरथदंतिनां तेषुसर्वेष्वनीकेषु
व्यतिषक्तेष्वनीकशः स्वेस्वान्जघ्नुःपरेभ्यांश्चस्वान्परेचपरेपरान् वीरबाहुविसृष्टाश्चयोधेषुव्राजेषुच राशयःप्रसदृश्यंतवाससांनेज
नेष्विव उद्यतप्रतिपिष्टानांखड्गानांवीरबाहुभिः सस्वनशब्दस्तद्रूपोवाससांनिज्यतामिव अर्द्धासिभिस्तथाखड्गैस्तोमरैःसपरस्वधैः निकृ
ष्टयुद्धंसंसक्तंमहदासीत्सुदारुणं गजाश्वकायप्रभवानरदेहप्रवाहिनी शरशस्त्रार्दिताःक्लांताराबिमूढाल्पचेतसः विष्टभ्यसर्वगात्रा
णिव्यतिष्ठन्गजवाजिनः बाहुभिःकवचैश्चित्रैःशिरोभिश्चारुकुंडलैः युद्धोपकरणैश्चान्यैस्तत्रतत्रप्रकाशितैः क्रव्यादसंघैराकीर्णामृ
र्द्धिपैः २ तैरपि नासीद्रथपथस्तत्रसर्वमायोधनंप्रति मज्जत्सुचक्रेषुरथान्सत्वमास्थायवाजिनः कथंचिदवहन्श्रांतावेपमानाःशरार्दिताः
कुलसत्वबलोपेतावाजिनोवारणोपमाः विह्वलंतद्धतमुद्भ्रांतंसभयंभारतातुरं बलमासीत्तदासर्वमृतेद्रोणार्जुनावुभौ तावेवास्तां

द्रो० निलयनंतावान्नोपनमेवच तावेवास्मेसमासाद्यजग्मुर्वैवस्वतक्षयं आवियमभवत्संवेकौरवाणांमहद्बलं पांचालानांचसंसक्तेनप्राज्ञायत
१३० किंचन अंतकाक्रीडसदृशंभीरूणांभयवर्द्धनं रथिवांराजवंशानामुछ्रितेमहतिक्षये ततस्कर्णोद्रोणेनवानार्जुनेनयुधिष्ठिरं नभीमसे
नेननयमौनपांचाल्यंनसात्यकिं नचदुःशासनंद्रौणिंनदुर्योधनसौबलौ नकृपंमद्रराजंचकृतवर्माणमेवच नचात्मानंनवात्मानंनक्षितिंनदि
शस्तथा पश्यामराजनसंसक्तानसैन्येनरजसावृतान् संभ्रांतेतुमुलेघोरेरजोमेघेसमुत्थिते द्वितीयामिवसंप्राप्तामममन्यंतनिशांतदा नज्ञा
यंतेकौरवेयानपांचालानपांडवाः नदिशोद्योन्नवोर्वीचनसमंविषमंतथा हस्तसंस्पर्शमापन्नान्परान्वाप्यथवास्वकान् न्यपातयंस्तदायुद्धे
नराःस्मविजयैषिणः उद्धतत्वात्तुरजसः प्रसेकाच्छोणितस्यच प्रासाद्यततरजोभौमंशीघ्रत्वादनिलस्यच तत्रनागाहयायोधारथिनोश्व
पदातयः पारिजातवनानीवव्यरोचन्रुधिरोक्षिताः ततोदुर्योधनःकर्णोद्रोणोदुःशासनस्तथा पांडवैःसमसज्जंतचतुर्भिश्चतुरोरथाः
दुर्योधनःसहभ्रात्रायमाभ्यांसमसज्जत वृकोदरेणराधेयोभारद्वाजेनचार्जुनः तद्घोरंमहदाश्चर्यंसर्वेप्रैक्षन्समीपतः रथर्षभाणांमु
ग्राणांसंनिपातममानुषं रथमार्गैर्विचित्रैस्तैर्विचित्ररथसंकुलं अपश्यन्रथिनोयुद्धं विचित्रंचित्रयोधिनां यतमानाःपराक्रांताःप
रस्परजिगीषवः जीमूताइववर्षांतेशरवर्षैरवाकिरन् तेरथान्सूर्यसंकाशानास्थिताःपुरुषर्षभाः अशोभंतयथामेघाःशारदाश्चलवि
द्युतः योधास्तेतुमहाराजक्रोधामर्षसमन्विताः स्पर्द्धिनश्चमहेष्वासाःकृतयत्नाधनुर्द्धराः अभ्यगच्छंस्तथान्योन्यंमत्तागजवृषाइव नत्वनंदे द्रो०
हमेदोस्तिकालेराजन्ननागते यत्रसर्वेनयुगपद्व्यशीर्यंतमहारथाः बाहुभिश्चरणैश्छिन्नैःशिरोभिश्चसकुंडलैः कार्मुकैर्विशिखैःप्रासैःखड्गैः १३०
५९

परशुपट्टिशैः नालीकैः क्षुद्रनाराचैर्नखरैः शक्तितोमरैः अन्यैश्च [illegible] विविधाकारैर्धौतैः प्रहरणोत्तमैः
विचित्रैर्विविधाकारैः शरीरावरणैरपि विचित्रैश्च रथैर्भग्नैर्हतैश्च गजवाजिभिः शून्यैश्च नगराकारैर्हतयोधध्वजै रथैः अ
मनुष्यैर्हयैस्त्रस्तैः कृष्यमाणैस्ततस्ततः वातायमानैरसकृद्धतवीरैरलंकृतैः व्यजनैः कंकटैश्चैव ध्वजैश्च विनिपातितैः
छत्रैराभरणैर्वस्त्रैर्माल्यैश्च सुसुगंधिभिः हारैः किरीटैर्मुकुटैरुष्णीषैः किंकिणीगणैः उरस्थैर्मणिभिर्निष्कैश्चूडामणिभिरे
व च आसीदायोधनं तत्र नभस्तारागणैरिव ततो दुर्योधनस्यासीन्नकुलेन समागमः अमर्षितेन क्रुद्धस्य क्रुद्धेनामर्षि
तस्य च अपसव्यं चकाराथ माद्रीपुत्रस्तवात्मजः किरंश्छरशतैर्हृष्टस्तत्र नादो महानभूत् अपसव्यं कृतं संख्ये भ्रात्
व्येनात्यमर्षिणा नामृष्यत तमप्याजौ प्रतिचक्रे पसव्यतः पुत्रस्तव महाराज राजा दुर्योधनो द्रुतं ततः प्रतिचिकीर्षितम
पसव्यं हते सुतं भवारयत तेजस्वी नकुलश्चित्रमार्गवित् स सर्वतो निवार्यैनं शरजालेन पीडयन् विमुखं नकुलं चक्रे तं सेना
समपूजयन् तिष्ठ तिष्ठेति नकुलो बभाषे तनयं तव संस्मृत्य सर्वदुःखानि तव दुर्मंत्रितेन च इति द्रोणपर्वणि संजय उवाच
ततो दुःशासनः क्रुद्धः सहदेवमुपाद्रवत् रथवेगेन तीव्रेण कंपयन्निव मेदिनीं तस्यापततः एवाशु भल्लेनामित्रकर्शनः माद्रीपुत्रः
शिरो यंतुः सशिरस्त्राणमच्छिनत् नैनं दुःशासनः सूतं नापि कश्चन सैनिकः कृत्तोत्तमांगमाशुत्वात् सहदेवेन बुद्धवान् यदा त
संगृहीतत्वात् प्रयांत्यश्वा यथासुखं ततो दुःशासनः सूतं बुबुधे गतचेतनं स हयान्संनिगृह्याजौ स्वयं हयविशारदः युयुधे रथि

बबरघद्भीतवत् सरर्देवसुतानस्वान्ती द्रोणीवाणैरवाकिरत् पीड्यमानाः शरैश्चाप्यग्र इवं स्तेततस्ततः सूर्यरश्मिप्रविष्टाभाः ताप्यन्तस्तस्त

नांधिष्ठोलघुचित्रंच सुदृढंच तदस्याद्भुतं कर्म्म दृष्ट्वा परे चापि संयुगे हृतस्तेन धनुर्ज्याने शरासनं धनुषा कर्म्म कुर्वन्नेवस्तु रश्मीन्स पुनरा
द्रो०
२३१
स्तृतत् छिन्द्वे तेषु तं वाणैर्भीमं पुत्रोभ्यवाकिरत् परीप्सन्स्त स्तं कर्णं लिरन्नंतरमापतत् शकोदरस्ततः कर्णं त्रिभिर्भल्लैः समाहि
तः व्याकर्णपूर्णमुक्तैर्वाह्वोरुरसि चानदत् सन्निवृत्स ततः कर्णः संवद्धित इवोरगः भीममावारयामास विकिरन्निशितांछरान्
तदस्त तुमुलं युद्धं भीमराधेययोरभूत तौ वृषाविव नर्दन्तौ विज्रंभन्तापनावुभौ वेगेन महतान्योन्यमसंरब्धावभिपेततुः अभिसंश्लिष्टयो
स्तु तयो रातूर्णं वर्षौर्द्वयोः विच्छिन्नशरपातत्वाद्गदायुद्धमवर्तत गदया भीमसेनस्तु कर्णस्य रथकूवरं विभेदशतधाराजंस्तदद्भुत
मिवाभवत ततो भीमस्य राधेयो गदामाविध्य वीर्यवान् अवासृजद्र्थे तां तु विभेद गदया गदां भीमसेनस्तु गदया कर्णस्य रथकूवरं
विभेदशतधा राजंस्तदद्भुतमिवाभवत् ततो भीमस्य राधेयो गदामाविध्य वीर्यवान अवासृजद्र्थे तां तु विभेद गदया तां ततो ६६
भीमः पुनर्गुर्वीं चिक्षेपाधिरथिं गदां तां शरैर्बहुभिः कर्णः सुपुंखैः सुप्रवेशितैः प्रत्यविध्यत्पुनश्चान्यैः स भीमं पुनराव्रजत् व्यालीव मंत्रा
भिहता कर्णबाणैरभिद्रुता तस्याः प्रतिनिपातेन भीमस्य विपुलो ध्वजः पपात सारथिश्चास्य मुमोह च गदाहतः स कर्णे सायकानष्टौ व्य
सृजन्क्रोधमूर्छितः ध्वजे शरासने चैव शरावापे च भारत तैस्तस्य निशितैः पीतैर्भीमसेनो महाबलः चिच्छेद परवीरघ्नः प्रहसन्नि
व भारत ध्वजं शरासनं चैव शरावापं च भारत कर्णोप्यमृष्य तं गर्हं हेमपृष्ठं दुरासदं ततस्तु पुनराधेयो हयानस्य रथेषुभिः ऋक्ष श्रीराम०
वर्णान् जघानाशु तथोभौ पार्ष्णिसारथी स विपन्नरथो भीमो नकुलस्याप्लुतो रथं हरिर्यथा गिरेः शृंगं समाक्रामदरिंदमः तथा द्रो २३१

णार्जुनेनैचित्रमपुष्येतांमहार्थोआचार्यशिष्योराजेंद्रकृतव्रह्मणोप्यपि लघुसंधानयोगाभ्यांलाघवेसौष्ठवरणेनच मोहरूपंतौमनुष्या
णांचकृत्स्नश्चिचमनोमित्र उपारमेनंतमवैपाथामरतसत्तम अदृष्टपूर्वेणश्रंतत्स्तघुद्धंगुरुशिष्ययोः विचित्रानरष्टतनामधेयाथमार्गेनुदी
पैतौ अमोघमपसव्यंचकर्तुवीरोतदोपज्ञः पराक्रमेनतपोमीथाहृष्टप्रसूनंघविस्मिताः तपोःसमभवद्युद्धंद्रोणपांडवयोर्महत् आ
मिषार्थेमहाराजगगनेश्येनयोरिव पद्मव्रकाद्रोणस्तत्कृतोपुत्रजिगीषया पत्नमतिजघानाशुघ्रहसंततस्पपांडव पराद्रोणेनशक्तोऽसि
पांडवस्यविशेषणं ततःप्रादुष्चकारास्त्रमस्त्रमार्गविशारदः ऐंद्रंपाशुपतंत्वाष्ट्रंवायव्यमथवारुणं मुक्तंमुक्तंद्रोणचापात्तज्जघानधनं
जयः अस्त्राण्येवमेतानिविधिवद्गुरुणास्तवः ततोस्त्रैःपरमैर्द्रोणःपार्थमवाकिरत् पद्मरसंत्तसपार्थोपपप्रुके विजिगीषया
तस्मात्स्वविज्ञातायनत्त्वष्टिक्रम्तेर्जुनः मवध्यमानेष्वस्त्रेषुदिव्येष्वपिपथाविधि अर्जुनेनार्जुनंद्रोणोमनसैवाभ्यपूजयत् मे
नेवात्मानमाधिकंपृथिव्यामपिभारत तेनशिष्येणसर्वेभ्यःशस्त्रविद्भ्यःपरंतपः वार्यमाणःकृपार्थेनतयामधैर्यमहात्मनो यतमानो
धिकंयोमसाधीयतेस्मार्जुनेनसः ततोंतरिक्षेदेवाश्चगंधर्वाश्चसहस्रशः ऋषयःसिद्धसंघाश्चव्यतिष्ठंतदिदृक्षया तदप्सरोभिराकीर्णं
यक्षगंधर्वसंकुलं श्रीमदाकाशमभवद्यथामेघाकुलंयथा तत्रस्मांतर्हिताचोच्चवांतपुनःपुनः द्रोणपार्थस्तवोपेताअश्रूपंतत न
ण्विप विसृज्यमानेष्वस्त्रेषुज्वलत्सुचदिशोदश अब्रुवंस्तत्रसिद्धाश्चऋषयश्चसमागताः नैवेदंमानुषंयुद्धंनासुरंनचराक्षसं
नैवदैवंनगांधर्वंब्राह्मंध्रुवमिदंपरं विचित्रमिदमाश्चर्यंननोदृष्टंनचश्रुतं अतिपांडवमाचार्योद्रोणंचाप्यतिपांडवः नानयो

द्रो०

२३२

रंतरं शक्यं द्रष्टुमस्त्रेषु केनचित् यदि हन्याद्विभक्तस्य पश्येतात्मानमात्मना तत्र शक्रोपमाकर्तुमस्त्रतुनाविद्यते ज्ञानमेकस्थमा
चार्यो ज्ञानं योगश्च पांडवे शौर्यमेकस्थमाचार्ये बलं शौर्यं च पांडवे नेमौ शक्यौ महेष्वासौ युद्धे द्रुपयितुं परैः इच्छमानौ पुनरिमौ हन्येतां सा
मरं जगत् इत्यब्रुवन्महाराज दृष्ट्वा तौ पुरुषर्षभौ अंतर्हितानि भूतानि प्रकाशानि च संघशः ततो द्रोणो ब्राह्ममस्त्रं प्रादुश्चक्रे महाम
तिः संतापयन् रणे पार्थं भूतान्यंतर्हितानि च ततश्चचाल पृथिवी सपर्वतवनद्रुमा ववौ च विषमो वायुः सागराश्चापि चुक्षुभुः
ततस्त्रासो महानासीत्कुरुपांडवसेनयोः सर्वेषां चैव भूतानामुद्यतेऽस्त्रे महात्मना ततः पार्थोऽप्यसंभ्रांतस्तदस्त्रं प्रतिजघ्निवान्
ब्रह्मास्त्रेणैव राजेंद्र ततः सर्वमशीशमत् यदा न गम्यते पारं तयोरन्यतरस्य वा ततः संकुलयुद्धेन तद्युद्धं व्याकुलीकृतं नाज्ञायत ततः
किंचित्पुनरेव विशांपते प्रवृत्ते तुमुले युद्धे द्रोणपांडवयोर्मृधे शरजालैः समाकीर्णे मेघजालैरिवांबरे न स्म संपतते कश्चिदंतरिक्षच
रस्तदा महाभारते द्रोणपर्वणि संजय उवाच तस्मिंस्तथा वर्तमाने नराश्वगजसंक्षये दुःशासनो महाराज धृष्टद्युम्नमयोधयत् स तु रुक्म
रथासक्तो दुःशासनशरार्दितः अमर्षात्तव पुत्रस्य शरैर्वाहानवाकिरत् क्षणेन स रथस्तस्य सध्वजः सहसारथिः नादृश्यत महाराज पार्षत
स्य शरैश्चितः दुःशासनस्तु राजेंद्र पांचाल्यस्य महात्मनः नाशकत्प्रमुखे स्थातुं शरजालप्रपीडितः स तु दुःशासनं बाणैर्विमुखीकृत्य पार्षतः
किरन्शरसहस्राणि द्रोणमेवाभ्ययाद्रणे अभ्यपद्यत हार्दिक्यः कृतवर्मा त्वनंतरं सोदर्याणां त्रयश्चैव त एनं पर्यवारयन् तं यमौ पृष्ठतोऽन्वैतां र एम०
क्षंतौ पुरुषर्षभौ द्रोणायाभिमुखं यांतं दीप्यमानमिवानलं संप्रहारमकुर्वंस्ते सर्वे सप्त महारथाः अमर्षिताः सत्त्ववंतः कृत्वा मरणमग्रतः शु २३२

हात्मानः सुहृदश्चाराजन्मार्गपुरस्कृताः आचार्यपुत्रमकुर्वंत परस्परजिगीषवः शुक्लाभिजनकर्माणो मतिमंतो जनाधिप धर्मयुद्धमयुध्यं
त प्रेप्संतो गतिमुत्तमां नतत्रासीदधर्मिष्ठमशस्त्रं युद्धमेव च नतत्र कर्णिनालीको नलिप्तो न च बस्तिकः न सूची कपिशो नात्र न गवास्थिग
जास्थिकः इषुरासीन्नसंश्लिष्टो न पूतिर्नचजिह्मगः ऋजून्येव विशुद्धानि सर्वे शस्त्राण्यधारयन् सुयुद्धेन परांल्लोकानीप्संतः कीर्तिमेव च तदासी
त्तुमुलं युद्धं सर्वदोषविवर्जितं चतुर्णां तव योधानां तैस्त्रिभिः पांडवैः सह धृष्टद्युम्नस्तु तान्दृष्ट्वा तव राजन्नथर्षभान् यमाभ्यां वारितान्वीरान्
शीघ्रास्त्रो द्रोणमभ्ययात् निवारितास्तु ते वीरास्तयोः पुरुषसिंहयोः समसज्जंत चत्वारो वाताः पर्वतयोरिव द्वाभ्यां द्वाभ्यां यमौ सार्द्धं रथाभ्यां
रथपुंगवौ समासक्तौ ततो द्रोणं धृष्टद्युम्नोऽभ्यवर्त्तत दृष्ट्वा द्रोणाय पांचाल्यं व्रजंतं युद्धदुर्मदं यमाभ्यां तांश्च संसक्तांस्तदंतरमुपाद्रवत् दु
र्योधनो महाराज किरन् शोणितभोजनान् तं सात्यकिः शीघ्रतरं पुनरेवाभ्यवर्त्तत तौ परस्परमासाद्य समीपे कुरुमाधवौ हसमानौ नृशार्दू
लावभीतौ समसज्जतां बाल्यवृत्तानि सर्वाणि प्रीयमाणौ विचिंत्य तौ अन्योन्यं प्रेक्षमाणौ च स्मयमानौ पुनः पुनः अथ दुर्योधनो राजा सात्यकि
मभाषत प्रियं सखायं सततं गर्हयन्वृत्तमात्मनः धिक्क्रोधं धिक्सखे लोभं धिङ्मोहं धिगमर्षितं धिगस्तु क्षात्रमाचारं धिगस्तु बलपौरु
षं यत्त्वमामभिसंधत्से त्वां चाहं शिनिपुंगव त्वं हि प्राणैः प्रियतरो ममाहं च सदा तव स्मरामि तानि सर्वाणि बाल्ये वृत्तानि यानि नौ तानि सर्वाणि
जीर्णानि सांप्रतं नौ रणाजिरे किमन्यत्क्रोधलोभाभ्यां युध्यामि त्वाद्य सात्वत तं तथावादिनं तत्र सात्यकिः प्रत्यभाषत प्रहसन्विशिखांस्तीक्ष्णा
नुद्यम्य परमास्त्रवित् नेयं सभा राजपुत्र नाचार्यस्य निवेशनं यत्र क्रीडितमस्माभिस्तदा राजन्समागतैः दुर्योधन उवाच क्व सा क्रीडा गता स्मा

द्रो०
२३३

कंवासेवेशिनिपुंगव क्षत्रयुद्धमिदंमन्ये:कालोहिदुरतिक्रम: किंनुनोविद्यतेकृत्यंधनेनधनलिप्सया यत्रयुध्यामहेसर्वेधनलोभात्समा
गता: ॥ संजयउवाच तंतथावादिनंतत्रराजानंमाधवोब्रवीत् एवंवृत्तंसदाक्षात्रंयद्युध्यंतीहगुरूनपि यदितेहंप्रियोराजन्जहिमांमाचिरंकृ
था: त्वत्कृतेसुकृतांल्लोकान्गच्छेयंभरतर्षभ याशक्तिर्बलंयच्चतत्क्षिप्रंमयिदर्शय नेच्छाम्येतदहंद्रष्टुंमित्राणांव्यसनंमहत्
इत्येवंव्यक्तमाभाष्यप्रतिभाष्यचसात्यकि: व्यक्तंयात्तूर्णमव्यग्रोदयांनाकुरुतात्मनि तमापतंतंमहाबाहुंप्रत्यगृह्णात्तवात्मज:
शरैश्चावाकिरद्राजन्शैनेयंतनयस्तव ततःप्रववृतेयुद्धंकुरुमाधवसिंहयो: अन्योन्यंक्रुद्धयोर्घोरंयथाद्विरदसिंहयो: ततःपूर्णायता
त्सृष्टै:सात्वतंयुद्धदुर्मदं दुर्योधन:प्रत्यविध्यत्कुपितोदशभि:शरै: तंसात्यकि:प्रत्यविध्यत्तथैवावाकिरच्छरै: पंचाशतापुनश्चाजौत्रिंश
तादशभिश्चह सात्यकिंतुरणेराजन्प्रहसंस्तनयस्तव आकर्णपूर्णैर्निशितैर्विव्याधत्रिंशताशरै: ततोस्यसशरंचापंक्षुरप्रेणाद्विधाछिनत्
सोन्यत्कार्मुकमादायलघुहस्तस्ततोदृढं सात्यकोव्यसृजच्चापिशरश्रेणींसुतस्यते तामापतंतींसहसाशरश्रेणींजिघांसया चिछेदबहु
धाराजातत्उच्चुक्रुशुर्जना: सात्यकिश्चत्रिसप्तत्यापीडयामासवेगित: स्वर्णपुंखै:शिलाधौतै राकर्णात्पूर्णनि:सृतै: तस्यसंदधतश्चे
षुंसंद्दृतेषुंचकार्मुकं अछिनत्सात्यकिस्तूर्णंशरैश्चैवाप्यविविधत् सगाढविद्धोव्यथित:प्रत्यपायाद्रथांतरं दुर्योधनोमहाराजदाशार्हशरपीडित:
समाश्वस्यतपुत्रस्तेसात्यकिंपुनरभ्ययात् विसृजन्निषुजालानियुयुधानरथंप्रति तथैवसात्यकिर्बाणान्दुर्योधनरथंप्रति प्रततेविसृज राम:
न्राजंस्तत्संकुलमवर्तत तत्रेषुभि:क्षिप्यमाणै:पतद्भिश्चशरीरिषु अग्नेरिवमहाकक्षेशब्द:समभवन्महान् तयो:शरसहस्रैश्चसंछन्नंवसुधातलं २३३

ग्रमहत्पंचशैराकाशंसमपद्यत तत्राधिकमालक्ष्माधर्वंरथसत्तमं क्षिप्रमभ्यपतत्कर्णःपीसिंत्तनपंतव ननतंमपेपामासभीम
सेनोमहाबलः सोभ्ययात्वरितः कर्णोविसृजन्सायकान्बहून तस्यकर्णःशितान्बाणान्प्रतिहत्यसहस्रन्निव धनुःशरांश्चचिछेद
स्ततेवास्यहनछरैः भीमसेनस्तुसंक्रुद्धोगदामादायपांडवः धजंधनुश्चसूतंचसममर्दाहवेरिपोः रथचक्रंचकर्णस्यबभंजस
महाबलः भग्नचक्रोरथेतिष्ठदकंपःशैलराडिव एकचक्रंरथंतस्यतमूहुःसुचिरंहयाः एकचक्रमिवार्कस्यरथंसप्तहयायथा
अमृष्यमाणःकर्णस्तुभीमसेनमयुध्यत विविधैरिषुजालैश्चनानाशस्त्रैश्चसंयुगे भीमसेनस्तुसंक्रुद्धःसूतपुत्रमयो
धयत तस्मिंस्तथावर्त्तमानेयुद्धेधर्मसुतोब्रवीत पांचालानांनरव्याघ्रोमत्स्यांश्चपुरुषर्षभान येनःप्राणाःशिरोपे
नोयेनोयोधामहारथाः तएतेधार्त्तराष्ट्रेषुविसक्ताःपुरुषर्षभाः किंतिष्ठतयथामूढाः सर्वेविगतचेतसः तत्रागच्छत
यत्रैतेयुध्यंतेमामकारथाः क्षत्रधर्मपुरस्कृत्यसर्वएवगतज्वराः जयंतोवध्यमानाश्चगतिमिष्टांगमिष्यथ जित्वावाब
हुभिर्यज्ञैर्यजध्वंभूरिदक्षिणैः हतावादेवताभूत्वालोकानप्राप्स्यथपुष्कलान तेराज्ञाचोदितावीरायोत्स्यमानामहारथाः
क्षत्रधर्मपुरस्कृत्यत्वरिताद्रोणमभ्ययुः पांचालास्त्वेकतोद्रोणमभ्यघ्नन्निशितैःशरैः भीमसेनपुरोगाश्चाप्येकतःपर्यवा
रयन त्रयाणांतुपांडुपुत्राणांत्रयोजिह्मामहारथाः यमौचभीमसेनश्चप्राक्रोशंस्तधनंजयं अभिद्रवार्ज्जुनक्षिप्रंकु
रून्द्रोणादपानुदततएनंहनिष्यंतिपांचालाहतरक्षिणं कौरवेयांस्ततःपार्थःसहसासमुपाद्रवत पांचालानेवतु
द्रोणोधृष्टद्युम्नपुरोगमान ननर्दुस्तारसावीराःपंचमेहनिभारत इतिद्रोणपर्वणि संजयउवाच पंचालानांततो

द्रो:
२३८

द्रोणोप्यकरोत्कदनंमहत् यथाक्रुद्धोरणेशक्रोदानवानांवधेपुरा द्रोणास्त्रेणमहाराजवध्यमानाःपरेयुधि नात्रसंत
रणेद्रोणात्सत्ववंतोमहारथाः वध्यमानामहाराजपांचालाःसृंजयास्तथा द्रोणमेवाभ्ययुर्युद्धेयोधयंतोमहारथं तेषां
तच्छाद्यमानानांपांचालानांसमंततः अभवद्भैरवोनादोवध्यतांशरवृष्टिभिः वध्यमानेषुसंग्रामे पांचालेषुसंग्रामे पांचा
लेषुमहात्मना उदीर्यमाणेद्रोणास्त्रेपांडवान्भयमाविशत् दृष्ट्वाश्वरथसंघानांविपुलंचक्षयंयुधि पांडवेयामहाराज
नाशशंसुर्जयंतदा कच्चिद्द्रोणोननःसर्वान्क्षपयेत्परमास्त्रवित् समिद्धःशिशिरापायेदहन्कक्षमिवानलः नचैनंसं
युगेकश्चित्समर्थःप्रतिवीक्षितुं नचैनमर्ज्जुनोजातुप्रतियुध्येतधर्मवित् त्रस्तान्कुंतीसुतान्दृष्ट्वाद्रोणसायकपीडि
तान् मतिमान्श्रेयसेयुक्तःकेशवोर्ज्जुनमब्रवीत् नैषयुद्धेनसंग्रामेजेतुंशक्यःकथंचन सधनुर्द्धन्विनांश्रेष्ठोदेवैरपि
सवासवैः सन्यस्तशस्त्रस्तुसंग्रामेशक्योहंतुंभवेन्नृभिः आस्थीयतांजयेयोगोधर्ममुत्सृज्यपांडवाः यथावःसंयुगेसर्व्वा
न्हन्याद्रुक्मवाहनः अश्वत्थाम्निहतेनैषयुध्येदितिमतिर्मम हतंतंसंयुगेकश्चिदस्मैशंसतुमानवः एतन्नारोचयद्राजन्
कुंतीपुत्रोधनंजयः अन्येत्वरोचयन्सर्वेकृच्छ्रेणतुयुधिष्ठिरः ततोभीमोमहाबाहुरनीके तेमहागजं जघानगदयारा राम०
न्नश्वत्थामानमित्युत परप्रमथनंघोरंमालवस्येंद्रवर्म्मणः भीमसेनस्तुसव्रीडमुपेत्यद्रोणमाहवे अश्वत्थामाहतइति २३५
शब्दमुच्चैश्चकारह अश्वत्थामेतिहिगजःख्यातोनाम्नाहतोभवत् कृत्वामनसितंभीमोमिथ्याव्याहृतवांस्तदा भीमसेनवचः
श्रुत्वाद्रोणस्तत्परमाप्रियं मनसासन्नगात्रोभूद्यथासैकतमंभसि शंकमानःसतन्मिथ्यावीर्यज्ञःस्वसुतस्यवै हतःसइति

वसुत्वानैवधैर्य्यादकंपत सलब्ध्वाचेतनांद्रोणःक्षणेनैवसमाश्वसत् अन्वचिंत्यात्मनःपुत्रमविषह्यमरातिभिःसपार्षतमभि
द्रुत्यजिघांसुर्महात्मनः अवाकिरन्महेष्वासोनीहारेणांककंपत्रिणां भूयश्चास्यक्षमादायदिव्यमांगिरसंधनुःशरांश्च
ब्रह्मदंडाभान्धृष्टद्युम्नमपोथयत् ततस्तंशरवर्षेणमहतासमवाकिरत् अशातयच्चसंक्रुद्धोधृष्टद्युम्नममर्षणं शरांश्चशत
धातस्यद्रोणश्चिच्छेदसायकैः ध्वजंधनुश्चनिशितैःसारथिंचाप्यपातयत् धृष्टद्युम्नःप्रहस्यान्यत्पुनरादायकार्मुकं शितेनचै
नंबाणेनप्रत्यविध्यत्स्तनांतरे सोतिविद्धोमहेष्वासःसंभ्रांतइवसंयुगे भल्लेनशितधारेणचिच्छेदास्यपुनर्द्धनुः यच्चास्यबा
णविकृतंधनुर्वापिचविशांपते सर्वंचिच्छेददुर्द्धर्षोगदांखड्गंचवर्जयन् धृष्टद्युम्नंचविव्याधनवभिर्निशितैःशरैः जीवितांतक
रैःक्रुद्धःक्रुद्धरूपःपरंतप धृष्टद्युम्नोथयस्यास्यान्रथस्यामेमहारथः व्यामिश्रयदमेयात्मारंतोजलदागमे तयोरत्मर्म्महाराजमि
श्रितारणामद्भुते ईषावेधे [illegible]
[illegible] युगंधंचकूवंधंतथैवच प्राणशपरमेयात्माधृष्टद्युम्नस्यसद्विजः सच्छिन्नधन्वापांचाल्योतिकृ
त्तध्वजसारथिः उत्तमामापदंप्राप्यगदांवीरःपरामृशत् तामस्यविशिखैस्तीक्ष्णैःक्षिप्यमाणांमहारथः निजघानशरैर्द्रो
णःक्रुद्धःसत्यपराक्रमः तांतुदृष्ट्वानरव्याघ्रोद्रोणेननिहतांशरैः विमलंखड्गमादत्तशतचंद्रंचभानुमत् असंशयंतथाभूते
पांचाल्यःसाध्वमन्यत वधमाचार्यमुख्यस्यप्राप्तकालंमहात्मनः ततःस्वरथनीडस्थःस्वरथस्याथेषया अगच्छदसिमुद्य
म्यशतचंद्रंचभानुमत् चिकीर्षुर्दुष्करंकर्म्मधृष्टद्युम्नोमहारथः इयेषवक्षोभेत्तुंसभारद्वाजस्यसंयुगे सोतिष्टद्युगमध्येवैयु

पात्मा ब्राह्ममस्त्रमुदीरयन् तेमिश्रयद्धृष्टद्युम्नस्तुजवनावातरंहसः पारावतसवर्णाश्च शोणाश्च भरतर्षभ यथासविद्युतोमे ९

२

द्रो॰ २३५

गमन्नहनेषुच जग्राहानार्हेषुयान्यानांतत्नेमाः समसृजयन तिष्ठतोयुगपालीषुद्रोणानप्यधितिष्ठतः नापश्यदंतरंद्रोणास्तदद्भु
तमिवाभवत क्षिप्रंक्षेपेनस्यचरतोपथैवामिषगृद्धिना तदृष्ट्वासदृशीमासेद्रोणपार्षतयोरणे तस्यपाणावतानस्यात्रयशक्ता
पराभिनत सर्वानेकैकशोद्रोणोक्रुशाणाव्यवर्जयत तेहतास्यपतन्भूमौधृष्टद्युम्नस्यवाजिनः शोणास्तुपर्यमुंचंतरथबंधा
द्विशांपते तानहयान्निहतान्दृष्ट्वाद्विजाग्र्याणसपार्षतः नामृष्यतयुधांश्रेष्ठोयाज्ञसेनिर्महारथः विरथःसगृहीत्वातुखड्गंखड्ग
भृतांवरः द्रोणमभ्यपतद्राजन्वैनतेयइवोरगं तस्यरूपंबभौराजन्भारद्वाजंजिघांसतः यथारूपंपुराविष्णोर्हिरण्यकशिपोर्वधे
सतदाविविधान्मार्गान्प्रवरांश्चैकविंशतिं दर्शयामासकौरव्यपार्षतोविचरन्रणे भ्रांतमुद्भ्रांतमाविद्धमाप्लुतंप्रसृतंसृतं परिवृत्तं
निवृत्तंचखड्गंचर्मचधारयन संपातंसमुदीर्णंचदर्शयामासपार्षतः भारतंकौशिकंचैवसात्वतंचैवशिक्षया दर्शयन्व्यचरद्यु
द्धेद्रोणस्यांतचिकीर्षया चरतस्तस्यतान्मार्गान्विचित्रान्खड्गचर्मिणः अमन्यतरणेयोधादेवताश्चसमागताः ततःशरसहस्रे
णशतचंद्रमपातयत चर्मखड्गंचसंबाधधृष्टद्युम्नस्यसद्विजः येतुवैतस्तिकानामशराह्यासन्नयोधिनः निकृष्टयुद्धेद्रोणस्यना
न्येषांसंतितेशराः ऋतेशारद्वतात्पार्थाद्द्रौणाद्वैकर्तनात्तथा प्रद्युम्नयुयुधानाभ्यामभिमन्योश्चभारत अथास्येषुंसमाधत्तदृढं
परमसंमतं अंतेवासिनमाचार्योजिघांसुःपुत्रसंमितं तंशरैर्दशभिस्तीक्ष्णैश्चिच्छेदशिनिपुंगवः पश्यतस्तवपुत्रस्यकर्णस्यचम राम॰ २३५
हात्मनः ग्रस्तमाचार्यमुख्येनधृष्टद्युम्नममोचयत चरंतंरथमार्गेषुसात्यकिंसत्यविक्रमं द्रोणकर्णांतरगतंकृपस्यापिचभारत
अपश्येतांमहात्मानौविष्वक्सेनधनंजयौ अपूजयेतांवार्ष्णेयंब्रुवाणौसाधुसाध्विति दिव्यान्यस्त्राणिसर्वेषांयुधिनिघ्नंतमच्युतं

अभिपद्यततस्तेषां विष्ठक्तेन धनंजयो धनंजयस्ततः कृष्णमब्रवीत्पश्य केशव आचार्यप्रमुख्यानां मध्ये क्रीडन्मधूद्वहः आनं
दयतिमां भूयः सात्यकिः परवीरहा माद्रीपुत्रौ च भीमं च राजानं च युधिष्ठिरं यच्छिक्षयानुद्धतः सन्रणे चरति सात्यकिः महा
रथानुपक्रीडन्वृष्णीनां कीर्त्तिवर्द्धनः तमेते प्रतिनंदंति सिद्धाः सैन्याश्च विस्मिताः अजय्यं समरे दृष्ट्वा साधु साध्विति सात्य
किं योधाश्चोभयतः सर्वैः कर्म्मभिः समपूजयन् इति द्रोणपर्व्वणि संजय उवाच सात्वतस्य तु तत्कर्म्म दृष्ट्वा दुर्योधनादयः शै
नेयं सर्वतः क्रुद्धा वारयामासुरंजसा कृपकर्णौ च समरे पुत्राश्च तव मारिष शैनेयं त्वरिताभ्येत्य विनिघ्नंति शितैः शरैः युधिष्ठिरस्
ततो राजा माद्रीपुत्रौ च पांडवौ भीमसेनश्च बलवान् सात्यकिं पर्य्यवारयन् कर्णश्च शरवर्षेण गौतमश्च महारथः दुर्योधनादय
स्तच शैनेयं पर्य्यवारयन् तां वृष्टिं सहसा राजंश्चिछिदुर्घोररूपिणीं वारयामास शैनेयो योधयंस्तान्महारथान् तेषामस्त्राणि
दिव्यानि संहितानि महात्मनां वारयामास विधिवद्दिव्यैरस्त्रैर्म्महामृधे क्रूरमायोधनं जज्ञे तस्मिन्राजसमागमे रुद्रस्येव हि
क्रुद्धस्य निघ्नतस्तान्पशून्पुरा हस्तानामुत्तमांगानां कार्मुकाणां च भारत छत्राणां चापविद्धानां चामराणां च संचयैः भग्नैश्च
कै रथैश्चापि पातितैश्च महाध्वजैः सादिभिश्च हतैः शूरैः संकीर्णा वसुधाभवत् बाणपातनिकृत्तास्तु योधास्ते कुरुसत्त[illegible] चे
ष्टंतो विविधाश्चेष्टा अदृश्यंत महाहवे वर्त्तमाने तथा युद्धे घोरे देवासरोपमे अब्रवीत्क्षत्रियांस्तत्र धर्मराजो युधिष्ठिरः अभिद्रवत
संयत्ताः कुंभयोनिं महारथाः एष हि पार्षतो वीरो भारद्वाजेन संगतः घटते च यथाशक्ति भारद्वाजस्य नाशने याद्रशानि हि रूपा

द्रो॰ १३६

णिदृश्यंतेस्ममहात्मनो अथद्रोणंरणेक्रुद्धोघातयिष्यतिपार्षतः तेषुपंसहितामल्लायुधध्वंकुंभसंभवं धृष्टद्युम्नस्यमाहात्म्य
गत्वाकुरुतमाधिवां युधिष्ठिरसमात्मजाः सृंजयानांमहारथाः अभ्यद्रवंतसंपन्नाभारद्वाजंजिघांसवः तान्समापततः सर्वान्
भारद्वाजोमहारथः अभ्यवर्तत वेगेनमर्त्यमितिनिश्चितः प्रयातेसत्यसंधेतुसमकंपतमेदिनी ववुर्वाताःसनिर्घातास्त्रा
सयानावहथिनीं पपातमहतीचोल्काआदित्यात्रिश्वासतत दीपयंतीउभेसेनेशंसंतीवमहद्भयं जज्वलुश्चैवशस्त्राणिभारद्वा
जस्यमारिष रथाःस्वनंतिचात्यर्थंहयाश्चाश्रूण्यपवासृजन हतौजाइवचाप्यासीद्भारद्वाजोमहारथः प्रास्फुरन्नयनंचास्यवामंवा
हुस्तथैवच विमनाश्चाभवद्युद्धेदृष्ट्वापार्षतमग्रतः ऋषीणांब्रह्मवादीनांस्वर्गस्यगमनंप्रति सुयुद्धेनततःप्राणानुत्स्रष्टुमुपच
क्रमे ततश्चतुर्दिशंसैन्यैर्द्रुपदस्याभिसंवृतः निर्दहन्क्षत्रियव्रातान्द्रोणःपर्यचरन्रणे हत्वाविंशतिसाहस्रान्क्षत्रियानरिमर्द
नः दशायुतानितीक्ष्णाग्रैरवधीद्विशिखैःशितैः सोतिष्ठदाहवेयत्तोविधूमोग्निरिवज्वलन् क्षत्रियाणामभावायब्राह्ममस्त्रंस
मास्थितः पांचाल्यंविरथंभीमोहतसर्वायुधंबली सविषण्णंमहात्मानंत्वरमाणःसमभ्ययात ततःस्वरथमारोप्यपांचाल्य
मरिमर्दनः अब्रवीदभिसंप्रेक्ष्यद्रोणमस्यंतमंतिकात नत्वदन्यइहाचार्यंयोद्धुमुत्सहतेपुमान त्वरस्वप्राग्वधायास्यत्वयिभारः
समाहितः सतथोक्तोमहाबाहुःसर्वभारसहंधनुः प्रतिपद्याददेहिप्रमाथिदृढधन्वांदृढं संरब्धश्चशरानस्यन्द्रोणंदुर्वारणंरणे राम॰
विवारयिषुराचार्यंशरवर्षैरवाकिरत तौन्यवारयतांश्रेष्ठौसंरब्धौरणशोभिनौ उदीरयेतांब्राह्माणिदिव्यान्यस्त्राण्यनेकशः १३६

सुमार

समहास्त्रे महाराज द्रोणमाच्छादयन्रणे निहत्यसर्वाण्यस्त्राणि भारद्वाजस्यपार्थिवः सचसात्वतान् शिवींश्चैववाह्लीका
नकौरवानपि रक्षिष्यमाणान्संग्रामे द्रोणंव्यधमदच्युतः मुक्तकेशस्तथाराजन्गभस्तिभिरिवां [redacted] वभौप्र
च्छादयन्नाशाः शरजालैः समंततः तस्य द्रोणो धनुश्छित्वा विध्याचैनंशिलीमुखैः मर्माण्यभ्यहनद्भूयः सव्यथां
परमामगात् तंविंशतिसहस्राणि पांचालानांनरर्षभाः तथाचरंतंसंग्रामे सर्वतोवाकिरंछरैः शरैस्तैराचितंद्रो
णंनापश्याममहारथं भास्करंजलदैरुद्धंवर्षास्विवविशांपते विधूयतान्वाणगणान्पंचालानांमहारथः
ततः प्रादुष्करोद्द्रोणोब्राह्ममस्त्रंपरंतपः वधायतेषांशूराणांपांचालानाममर्षितः ततोव्यमोचयत्द्रोणोवि
निघ्नन्सर्वसोमकान् शिरांस्यपातयच्चापिपांचालानांमहामृधे तथैवपरिघाकारान्वाहून्कनकभूषणा
न् तेवध्यमानाः समरेभारद्वाजेनपार्थिवाः मेदिन्यामन्वकीर्यन्तवातनुन्नाइवद्रुमाः कुंजराणांचपततांहयो
घानांचभारत अगम्यरूपापृथिवीमांसशोणितकर्दमा हत्वाविंशतिसाहस्रान्पांचालानांरथव्रजान्
अतिष्ठदाहवेद्रोणोविधूमोग्निरिवज्वलन् तथैवचपुनःक्रुद्धोभारद्वाजःप्रतापवान् वसुदानस्यभल्लेनशिरः
कायादपाहरत् पुनःपंचशतान्मत्स्यान्षट्सहस्रांश्चसृंजयान् हस्तिनामयुतंहत्वाजघानाश्वायुतंपुनः क्षत्रि
याणामभावायदृष्ट्वाद्रोणमवस्थितं ऋषयोभ्यागमंस्तूर्णंहव्यवाहपुरोगमाः विश्वामित्रोजमदग्निर्भरद्वाजो
थगौतमः वशिष्ठः काश्यपोत्रिश्च ब्रह्मलोकंनिनीषवः सिकताः पृश्नयोगर्गावालिखिल्यामरीचिपाः [redacted]

द्रो० भृगवोंगिरसश्चैव सूक्ष्माश्चान्येमहर्षयः तएनमब्रुवन्सर्वेद्रोणमाहवशोभिनं अधर्म्मतः कृतंयुद्धं समयोनिधनस्यते
२३७ न्यस्यायुधं रणेद्रोणसमेत्यास्मानवस्थितान नातः क्रूरतरंकर्म्मपुनः कर्त्तुमिहार्हसि वेदवेदांगविदुषः सत्य
धर्म्मरतस्यते ब्राह्मणस्यविशेषेणतवैतन्नोपपद्यते न्यस्यायुधममोघेषोतिष्ठवर्त्मनिशाश्वते परिपूर्णश्चकालस्ते
स्तुंवैलोकेद्यमानुषे ब्रह्मास्त्रेणत्वयादग्धास्त्रनस्त्रज्ञानराभुवि यदेतदीदृशंविप्रकृतंकर्म्मनसाधुतत न्यस्यायु
धंरणेविप्रद्रोणमात्वंचिरंकृथाः मापापिष्ठतरंकर्म्मकरिष्यसिपुनर्द्विज इतितेषांवचः श्रुत्वाभीमसेनवचश्चतत
धृष्टद्युम्नंचसंप्रेक्ष्यरणेसविमनाभवत संदिह्यमानोव्यथितः कुंतीपुत्रंयुधिष्ठिरं आहतंवाहतंवापिपप्रच्छसुत
मात्मनः स्थिराबुद्धिर्हिद्रोणस्यनपार्थोवक्ष्यतेनृतं त्रयाणामपिलोकानामैश्वर्यार्थेकथंचन तस्मात्तंपरिपप्र
च्छनान्यंकंचिद्द्विजर्षभः तस्मिंस्तस्यहिसत्याशाबाल्यात्प्रभृतिपांडवे ततोनिष्पांडवामुर्वीकरिष्यंतंयुधांपतिं द्रो
णंज्ञात्वाधर्मराजंगोविंदोव्यथितोब्रवीत यद्यर्द्धदिवसंद्रोणोयुध्यतेमन्युमास्थितः सत्यंब्रवीमितेसेनाविना
शंसमुपैष्यति सभवांस्त्रातुनोद्रोणात्सत्याज्ज्यायोनृतंवदेत अनृतंजीवितस्यार्थेवदन्नस्पृश्यतेनृतैः तयोःसंवद
तोरेवंभीमसेनोब्रवीदिदं श्रुत्वैवतंमहाराजवधोपायंमहात्मनः गाहमानस्यतेसेनांमालवस्येंद्रवर्म्मणः अश्व
त्थामेतिविख्यातोगजः शक्रगजोपमः निहतोयुधिविक्रम्यततोहंद्रोणमब्रुवं अश्वत्थामाहतोब्रह्मन्निवर्त्तस्वाहवा
दिति नूनंनाश्रद्दधद्वाक्यमेषमेपुरुषर्षभः सत्वंगोविंदवाक्यानिमानयस्वजयैषिणः द्रोणायनिहतंशंसराजन्शार
द्वतीसुतं त्वयोक्तोनैषयुध्येतजातुराजन्द्विजर्षभः सत्यवान्हित्रिलोकेस्मिन्भवान्ख्यातोजनाधिप तस्यतद्वचनंश्रु श्रीराम०
२३७

ग्र१

त्वाकृष्मवा प्रचोदितः माविलाब्धमहाराजवक्तुंसमुपचक्रमे तमसत्यभयेमग्नोजयेसक्तोयुधिष्ठिरः अव्यक्तमब्र
वीद्राजन्हतःकुंजरइत्युत तस्यपूर्वंरथः पृथ्व्यामंगुलंगुलमपोच्छ्रितः बभूवैवंचतेनोक्तेतस्यवाहाःस्पृशन्महीं यु
धिष्ठिराद्वचतत्श्रुत्वा कर्णश्रुत्वाद्रोणोमहारथः पुत्रव्यसनसंतप्तोनिराशोजीवितेभवत् आगस्कृतमिवात्मानंपांडवा
नां महात्मनां ऋषिवाक्येनमन्वानःश्रुत्वाचनिहतंसुतं विचेताःपरमोद्विग्नोधृष्टद्युम्नमवेक्ष्यच योद्धुंनाशक्नु
वद्राजन्यथापूर्वमरिंदम महाभारतेद्रोणपर्वणि संजयउवाच तंदृष्ट्वापरमोद्विग्नंशोकोपहतचेतसं पांचाल
राजस्यसुतोधृष्टद्युम्नःसमाद्रवत् यइष्ट्वामनुजेंद्रेणद्रुपदेनमहामखे लब्धोद्रोणविनाशायसमिद्धाद्धव्यवाहना
त् सधनुर्जैत्रमादायघोरंजलदनिस्वनं दृढज्यमजरंदिव्यंशरंचाशीविषोपमं संदधेकार्मुकेतस्मिंस्तस्म
नलोपमं द्रोणंजिघांसुःपांचाल्योमहाज्वालमिवानलं तस्यरूपंशरस्यासीद्धनुर्ज्यामंडलांतरे द्योततोभास्करस्ये
वघनांतेपरिवेषिणः पार्षतेनपरामृष्टंज्वलंतमिवतद्धनुः अंतकालमनुप्राप्तंमेनिरेवीक्ष्यसैनिकाः तमिषुं
संहितंतेनभारद्वाजःप्रतापवान् दृष्ट्वामन्यतदेहस्यकालपर्यायमागतं ततःप्रयत्नमातिष्ठदाचार्यस्तस्यवारणे
नचास्यास्त्राणिराजेंद्रप्रादुरासन्महात्मनः तस्यत्वहानिचत्वारिक्षपाचैकाचयतोगता तस्यचाह्नस्त्रिभागेनक्षयंज
ग्मुःपतत्रिणः सशरक्षयमासाद्यपुत्रशोकेनचार्दितः विविधानांचदिव्यानामस्त्राणामप्रसादितः उत्स्रष्टुकामः
शस्त्राणिऋषिवाक्यप्रचोदितः तेजसापूर्यमाणश्चयुयुधेनयथापुरा ततोभीमोदृढंक्रोधात्द्रोणस्याश्लिष्यतंर
थं शनकैरिवराजेंद्रद्रोणंवचनमब्रवीत् यदिनामनयुध्येरन्शिक्षिताब्रह्मबंधवः स्वकर्मभिरसंतुष्टानस्मक्षत्रंक्ष

द्रो० पंप्रजेत अहिंसासर्वभूतेषुधर्मेस्थापिस्तरं विदुः तस्मात्त्वब्राह्मणोमूलं भवांश्चब्रह्मवित्तमः श्वपाकवन्म्लेच्छगणान् हत्वाचा
२३८ न्यान पृथग्विधान अज्ञानान्मूढवद्ब्रह्मन पुत्रदारधनेप्सया एकस्यार्थेबहून हत्वापुत्रस्याधर्मविद्यथास्वकर्मस्थान
विकर्मस्थोनव्यपत्रपसेकथं यस्यार्थेशस्त्रमादाययमपेक्ष्यचजीवसि मुखाधपतितंशेतेपृष्टेनावेदितस्तव धर्मेण
जेनतद्राक्यंनाभिशंकितुमर्हसि एवमुक्तस्ततोद्रोणोभीमेनोत्सृज्यतद्धनुः सर्वाणिशस्त्राणिधर्मात्माहातुकामोभ्यभाष स्मा८
त कर्णकर्णमहेष्वासकृपदुर्योधनेतिच संग्रामेक्रियतांयत्नोब्रवीम्येष पुनः८ पांडवेभ्यः शिवंवोस्तुशस्त्रम पुन८५
भ्युत्सृजाम्यहं इतितत्रमहाराजप्राक्रोशन द्रौणिमेवच उत्सृज्यचरणेशस्त्रंरथोपस्थेनिवेश्यच अभयंस
र्वभूतानांप्रददौयोगयुक्तवान तस्यतच्छिद्रमाज्ञायधृष्टद्युम्नःप्रतापवान सशरंतद्धनुर्घोरंसंन्यस्याथरथेत
तः खड्गीरथादवप्लुत्यसहसाद्रोणमभ्ययात हाहाकृतानिभूतानिमानुषाणीतराणीच द्रोणंतथागतंदृष्ट्वा
धृष्टद्युम्नवशंगतं हा हाकारंभृशंचक्रुरहोधिगितिचाब्रुवन द्रोणोपिशस्त्राण्युत्सृज्यपरमंसाम्यमास्थि
तः तथोक्त्वायोगमास्थायज्योतिर्भूतोमहातपाः पुराणंपुरुषंविष्णुंजगाममनसापरं मुखंकिंचित्समुन्नाम्यविष्
भ्योरस्मग्रतः निमीलिताक्षःसत्वस्थोनिक्षिप्यहृदिधारणां ॐमित्येकाक्षरंब्रह्मज्योतिर्भूतोमहातपाः स्मरित्वा
देवदेवेशमक्षरंपरमंप्रभुं दिवमाक्रमदाचार्यःसद्भिःसहदुराक्रमं द्वौसूर्याविति नोबुद्धिरासीत्तस्मिंस्तथागते
एकाग्रमिवचासीद्धिज्योतिर्भिःपूरितंनभः समपद्यतयथार्कार्भंद्रोणस्यनिधनेतथा निमेषमात्रेणचतज्ज्योतिरं श्री एम०
तरधीयत आसीत्किलकिलाशब्दःप्रहृष्टानांदिवौकसां ब्रह्मलोकंगतेद्रोणेधृष्टद्युम्नेचमोहिते वयमेवतदाद्राक्ष्मपं २३८

चमानुजयोनयः योगयुक्तं महात्मानं गच्छंतं परमां गतिं अहं धनंजयः पार्थो भारद्वाजस्य चात्मजः वासुदेवश्च वार्ष्णेयो धर्मपु
त्रश्च पांडवः अन्ये तु सर्वे नापश्यन् भारद्वाजस्य धीमतः महिमानं महाराज योगयुक्तस्य गच्छतः ब्रह्मलोकं महद्दिव्यं देव
गुह्यं हि तत्परं गतिं परमिकां प्राप्तमजानंतो नृयोनयः नापश्यन् गच्छमानं हि तं सार्द्धं ऋषिपुंगवैः आचार्यो योगमास्था
य ब्रह्मलोकमरिंदमं वितुन्नांगं शरैस्तैश्च न्यस्तायुधमसृक्क्षरं धिक्कृतः पार्षतस्तं तु सर्वभूतैः परामृशत् तस्य मूर्द्धा
नमालंब्य गतसत्वस्य देहिनः किंचिदब्रुवतः कायाद्विचकर्तासिना शिरः हर्षेण महता युक्तो भारद्वाजे निपातिते सिं
हनादरवं चक्रे भ्रामयन्खड्गमाहवे आकर्णपलितः श्यामो वयसाशीतिपंचकः त्वत्कृते व्यचरत्संख्ये स तु षोडशवर्ष
वत् उक्तवांश्च महाबाहुः कुंतीपुत्रो धनंजयः जीवंतमानयाचार्यं मा वधीर्द्रुपदात्मज न हंतव्यो न हंतव्य इति ते सैनि
काश्च ह उत्क्रोशन्नर्जुनश्चैव सानुक्रोशस्तमाव्रजत् क्रोशमानेर्जुने चैव पार्थिवेषु च सर्वशः धृष्टद्युम्नोवधीद्द्रोणं
रथतल्पे नरर्षभं शोणितेन परिक्लिन्नो रथाद्भूमिमरिंदमः लोहितांग इवादित्यो दुर्दर्शः समपद्यत एवं तं निह
तं संख्ये ददृशे सैनिको जनः धृष्टद्युम्नस्तु तद्राजन्भारद्वाजशिरोहरत् तावकानां महेष्वासः प्रमुखे तत्समाक्षिप
त् ते तु दृष्ट्वा शिरो राजन्भारद्वाजस्य तावकाः पलायनकृतोत्साहा दुद्रुवुः सर्वतो दिशं द्रोणस्तु दिवमास्थाय नक्षत्रप
थमाविशत् अहमेव तदाद्राक्षं द्रोणस्य निधनं नृप ऋषेः प्रसादात्कृष्णस्य सत्यवत्याः सुतस्य च विधूमामिव संयांतामु
ल्कां प्रज्वलितामिव अपश्याम दिवं स्तब्ध्वा गच्छंतं तं महाद्युतिं हते द्रोणे निरुत्साहान्कुरून्पांडवसृंजयाः
अभ्यद्रवन्महावेगास्ततः सैन्यं व्यदीर्यत निहता हतभूयिष्ठाः संग्रामे निहतैः शरैः तावका निहते द्रोणे गतासव इवा

द्रो० भवत् पराजयभयाद्वा यथ पत्त्रच महद्भयं अपयनेव ते हि नानाविंदन् धृतिमात्मनः अन्विछंतः शरीरं तु भारद्वाजस्य पार्थिवा
२३५ ः नाध्यगच्छन् महाराज कबंधायुतसंकुले पांडवास्तु जयं लब्ध्वा परत्र च महद्यशः बाणशंखरवांश्चक्रुः सिंहनादांश्च पुष्कलान्
भीमसेनस्ततो राजन् धृष्टद्युम्नश्च पार्षतः वं छिन्नामहद्रूपे तां परिष्वज्य परस्परं अब्रवीद्वचनं भीमः पार्षतं शत्रुतापनं
भूयो हं त्वा विजयिनं परिष्वज्यामि पार्षत सूतपुत्रे हते पापे धार्तराष्ट्रे च संयुगे एतावदुक्त्वा भीमस्तु हर्षेण महता युतः बाहु
शब्देन पृथिवीं कंपयामास पांडवः तस्य शब्देन वित्रस्ताः प्राद्रवंस्तावकायुधि क्षत्रधर्मं समुत्सृज्य पलायनपरायणाः पांडु
वास्तु जयं लब्ध्वा हृष्टा ह्यासन् विशांपते अरिक्षयं च संग्रामे तेन ते सुखमाप्नुवन्॥ ॥इति महाभारते द्रोणपर्वणि द्रोणव
धः समाप्तः संजय उवाच ततो द्रोणे हते राजन् कुरवः शस्त्रपीडिताः हतप्रवीरा विध्वस्ता भृशं शोकपरायणाः उदीक्षंतश्च प
रान् हृष्टान् हृष्टमनसः पुनः अश्रुपूर्णेक्षणास्त्रस्ता दीनास्त्वासन् विशांपते विचेतसो हतोत्साहाः कश्मलाभिहतौज
सः आर्तस्वरेण महता पुत्रं ते पर्यवारयन् रजस्वला वेपमाना वीक्षमाणा दिशो दश अश्रुकंठा यथा दैत्या हिरण्या
क्षे पुरा हते सतैः परिवृतो राजन् त्रस्तैः क्षुद्रमृगैरिव अशक्नुवन्नवस्थातुमपायात्तनयस्तव क्षुत्पिपासापरिम्लानास्ते यो
धास्तव भारत आदित्येनेव संतप्ता भृशं विमनसो भवन् भास्करस्येव पतनं समुद्रस्येव शोषणं विपर्यासं यथा मेरोर्वास
वस्येव निर्जयं अमर्षणीयं तद्दृष्ट्वा भारद्वाजस्य पातनं त्रस्तरूपतरा राजन् कौरवाः प्राद्रवन् भयात् गांधारराजः शकु
निस्त्रस्तस्त्रस्ततरैः सह हतं रुक्मरथं श्रुत्वा प्राद्रवत्सहितो रथैः वरूथिनीं वेगवतीं विद्रुतां सपताकिनीं परिगृह्य
महासेनां सूतपुत्रोपयाद्भयात् रथनागाश्वकलिलां पुरस्कृत्य तु वाहिनीं मद्राणामीश्वरः शल्यो वीक्षमाणोपया श्रीराम०

२३५

द्रयात हितप्रवीरैर्भग्नैर्ध्वजैर्नष्टपताकिभिः कृपः शारद्वतो गच्छन् कष्टं कष्टमिति ब्रुवन् भोजानीकेन शिष्टेन कलिंगार
ट्टवाह्लिकैः कृतवर्मा वृतो राजन् प्रायात्सुजवनैर्हयैः पदातिगणसंयुक्तस्त्रस्तो राजन् भयार्दितः उलूकः प्राद्र
वत्तत्र दृष्ट्वा द्रोणं निपातितं दर्शनीयो युवा चैव शौर्ये च कृतलक्षणः दुःशासनो भृशोद्विग्नः प्राद्रवद्गजसंवृतः
रथानामयुतं गृह्य त्रिसाहस्रं च दंतिनां वृषसेनो ययौ तूर्णं दृष्ट्वा द्रोणं निपातितं गजाश्वरथसंयुक्तो वृतश्चैव
पदातिभिः दुर्योधनो महाराज प्रायात्तत्र महारथः संशप्तकगणान् गृह्य हतशेषान् किरीटिना सुशर्मा
प्राद्रवद्राजन् दृष्ट्वा द्रोणं निपातितं गजान् रथान् समारुह्य मुद्दस्य च हयान् जनाः प्राद्रवन् सर्वतः संख्ये दृष्ट्वा रुक्मरथं
हतं त्वरयंतः पितॄनन्ये भ्रातॄनन्येऽथ मातुलान् पुत्रानन्ये वयस्यांश्च प्राद्रवन् कुरवस्तथा चोदयंतश्चन्यानि स्व से
स्रीयांश्च तथापरे संबंधिनस्तथान्ये च प्राद्रवंत दिशो दश प्रकीर्णकेशा विध्वस्ता न द्वावेकत्र धावतः नेदमस्तीति
मन्वाना हतोत्साहा हतौजसः उत्सृज्य कवचानन्ये प्राद्रवंस्तावका विभो अन्योन्यं ते समाक्रोशन् सैनिका भरत
र्षभ तिष्ठ तिष्ठेति न च ते स्वयं तत्रावतस्थिरे धुर्यानुन्मुच्य च रथाद्धतसूतान् स्वलंकृतान् अधिरुह्य हयान् योधाः क्षि
प्रं पद्भिरचोदयन् द्रवमाणे तथा सैन्ये त्रस्तरूपे हतौजसि प्रतिस्रोत इव ग्राहो द्रोणपुत्रः परानियात् तस्यासीत्सु
महद्युद्धं शिखंडिप्रमुखैर्गणैः। प्रभद्रकैश्च पांचालैश्चेदिभिश्च सकेकयैः हत्वा बहुविधाः सेनाः पांडूनां युद्धदुर्म
दः कथंचित्संकरान्मुक्तो मत्तद्विरदविक्रमः द्रवमाणं बलं दृष्ट्वा पलायनकृतक्षणं दुर्योधनं समासाद्य द्रोणपुत्रो
ऽब्रवीदिदं किमियं द्रवते सेना त्रस्तरूपेव भारत द्रवमाणां च राजेंद्र नावस्थापयसे रणे त्वं चापि न यथापूर्वं प्रकृतिस्थो

द्रो २४० नराधिपकर्णोत्तमत्तयथ्रैमेनावतिष्ठंतिपार्थिव अन्येष्वपिचयुद्धेषुवंसेनाद्रुवतदा कच्चित्क्षेमंमहाबाहोतवसैन्यस्यभार
त कच्चिन्मिहंदहतेराजन्नथसिंहेवलंतव एतामवस्थांसंप्राप्तंतन्ममाचक्ष्वकौरव ततुर्दुर्योधनःश्रुत्वाद्रोणपुत्रस्यभाषितं
घोरमप्रियमाख्यातुंनाशक्नोत्पार्थिवर्षभ भिन्नानौरिवतेपुत्रोमग्नःशोकमहार्णवे बाष्पेणपिहितोदृष्ट्वाद्रोणपु
त्रंरथेस्थितं ततःशारद्वतंराजासव्रीडमिदमब्रवीत् शंसात्रभद्रंतेसर्वंयथासैन्यमिदंद्रुतं अथशारद्वतोराजन्ना
र्त्तेमाहुस्त्वपुनःपुनः प्रशंसद्रोणपुत्रायपयथाद्रोणोनिपातितः कृपाचार्यउवाच वयंद्रोणंपुरस्कृत्यपृथिव्यां
प्रवरंरथं प्रावर्त्तयामसंग्रामंपांचालैरेवकेवलैः ततःप्रवृत्तेसंग्रामेविमिश्राःकुरुसोमकाः अन्योन्यमभिग
र्जंतःशस्त्रैर्देहानपातयन् वर्त्तमानेतथायुद्धेक्षीयमानेषुसंयुगे धार्त्तराष्ट्रेषुसंक्रुद्धःपितातेस्त्रमुदैरयत् ततो
द्रोणोब्राह्ममस्त्रंविकुर्वाणोनरर्षभः व्यहनच्छात्रवानभल्लैःशतशोथसहस्रशः पांडवाःकेकयामत्स्याःपांचाला
श्चविशेषतः संख्येद्रोणरथंप्राप्यव्यनशन्कालचोदिताः सहस्रंनरसिंहानांद्विसाहस्रंचदंतिनां द्रोणोब्रह्मास्त्रयोगेन
प्रेषयामासमृत्यवे आकर्णपलितःश्यामोवयसाशीतिपंचकः रणेपर्यचरद्द्रोणोवृद्धःषोडशवर्षवत् क्लिश्यमा
नेषुसैन्येषुवध्यमानेषुराजसु अमर्षवशमापन्नाःपांचालाविमुखाभवन् तेषुकिंचित्प्रभग्नेषुविमुखेषुसपत्नजित् दि
व्यमस्त्रंविकुर्वाणोबभूवार्कइवोदितः समध्यंप्राप्यपांडवानांशररश्मिःप्रतापवान् मध्यंगतइवादित्योदुष्प्रेक्षस्तेपिताभव
त् तेदह्यमानाद्रोणेनसूर्येणेवविराजता दग्धवीर्यानिरुत्साहाबभूवुर्हतचेतसः तान्दृष्ट्वापीडितान्बाणैर्द्रोणेनमधु
सूदनः जयैषीपांडुपुत्राणामिदंवचनमब्रवीत् नैषजातुनरैःशक्योजेतुंशस्त्रभृतांवरः अपिवृत्रहणासंख्येरथयू
थपयूथपः तेयूयंधर्ममुत्सृज्यजयंरक्षतपांडवाः यथावःसंयुगेसर्वान्नहन्याद्रुक्मवाहनः अश्वत्थाम्निहतेनैषयुध्ये श्रीराम० २४०

दितिमतिर्मम हतंतंसंयुगेकश्चिद्ब्रूयात्वत्समेमृषानरः एतन्नारोचयद्वाक्यंकुंतीपुत्रोधनंजयः अरोचयंस्तुसर्वेन्येकृच्छ्रेण
तुयुधिष्ठिरः भीमसेनस्तुसव्रीडमब्रवीत्पितरंतव अश्वत्थामाहतइतितत्राबुध्यततेपिता सशंकमानस्तन्मिथ्याधर्म
राजमपृच्छत हतंवाप्यहतंवाजौत्वांपितापुत्रवत्सलः तमतथ्यभयेमग्नोजयेसक्तोयुधिष्ठिरः अश्वत्थामानमायोधे
हतंदृष्ट्वामहागजं भीमेनगिरिवर्ष्माणंमालवस्येंद्रवर्म्मणः उपह्वत्यतदाद्रोणमुच्चैरिदमुवाचह यस्यार्थेशस्त्रमाध
त्सेयमवेक्ष्यचजीवसि [illegible] पुत्रस्तेदयितोनित्यंसोश्वत्थामानिपातितः शेतेविनिहतोभूमौव
नेसिंहशिशुर्यथा जानन्नप्यनृतस्याथदोषान्सद्विजसत्तम अव्यक्तमब्रवीद्राजाहतःकुंजरइत्युत सत्वांनिहतमाक्रंदे
श्रुत्वासंतापतापितः नियम्यदिव्यान्यस्त्राणिनायुध्यतयथापुरं तंदृष्ट्वापरमोद्विग्नंशोकातुरमचेतसं पांचालराजस्यसु
तःक्रूरकर्मासमाद्रवत् तंदृष्ट्वाविहितंमृत्युंलोकेतत्वविचक्षणः दिव्यान्यस्त्राण्यथोत्सृज्यरणेप्रायमुपाविशत् त
तोस्यकेशान्सव्येनगृहीत्वापाणिनातदा पार्षतःक्रोशमानानांवीराणामच्छिनच्छिरः नहंतव्योनहंतव्यइतितेसर्वतो
ब्रुवन् तथैवचार्जुनोवाहादवरुह्यैनमाद्रवत् उद्यम्यत्वरितोबाहूब्रुवाणश्चपुनःपुनः जीवंतमानयाचार्यंमावधी
रपिधर्मवित् तथापिवार्यमाणेनकौरवैरर्जुनेनच हतएवनृशंसेनपितातवनरर्षभ सैनिकाश्चततःसर्वेप्राद्र
वंतभयार्दिताः वयंचापिनिरुत्साहाहतेपितरितेनघ संजयउवाच तच्छ्रुत्वाद्रोणपुत्रस्तुनिधनंपितुराहवे
क्रोधमाहारयत्तीव्रंपदाहतइवोरगः ततःक्रुद्धोरणेद्रौणिर्भृशंजज्वालमारिष यथेंधनंमहत्प्राप्यप्राज्वलद्धव्य
वाहनः तलंतलेननिष्पिष्यदंतैर्दंतानुपस्पृशन् निश्वसन्नुरगोयद्वल्लोहिताक्षोभवत्तदा महाभारतेद्रोणपर्वणि

द्रो०

धृतराष्ट्रउवाच अधर्मेणहतंश्रुत्वाधृष्टद्युम्नेनसंजय ब्राह्मणंपितरंवृद्धमश्वत्थामाकिमब्रवीत मानुषंवारुणाग्नेयंब्राह्म
२४१ मस्त्रंचवीर्यवान ऐंद्रंनारायणंचैवयस्मिन्नित्यंप्रतिष्ठितं तमधर्मेणधर्मिष्ठंधृष्टद्युम्नेनसंयुगे श्रुत्वानिहतमाचार्यंसो
श्वत्थामाकिमब्रवीत येनरामादवाप्येहधनुर्वेदंमहात्मना प्रोक्तान्यस्त्राणिदिव्यानिपुत्रायगुणकांक्षिणा एकमेव
हिलोकेस्मिन्नात्मनोगुणवत्तरं इच्छंतिपुरुषाःपुत्रंलोकेनान्यंकथंचन आचार्याणांभवंत्येवरहस्यानिमहात्मनः ता
निपुत्रायवादद्युःशिष्यायानुगतायवा सशिष्यःप्राप्यतत्सर्वंसविशेषंचसंजय शूरःशारद्वतीपुत्रःसंख्येद्रोणादनंत
रः रामस्यानुसमःशास्त्रेपुरंदरसमोयुधि कार्त्तवीर्यसमोवीर्येबृहस्पतिसमोमतौ महीधरसमःस्थैर्येतेजसाग्निसमोयुवा
समुद्रइवगांभीर्येक्रोधेनाशीविषोपमः सरथीप्रथमोलोकेदृढधन्वाजितक्लमः शीघ्रोनिलइवाक्रंदेचरन्क्रुद्धइवां
तकः अस्यतायेनसंग्रामेधरण्यभिविपीडिता योनव्यथतिसंग्रामेवीरःसत्यपराक्रमः वेदस्नातोव्रतस्नातोधनुर्वेदेच
पारगः महोदधिरिवाक्षोभ्योरामोदाशरथिर्यथा तमधर्मेणधर्मिष्ठंधृष्टद्युम्नेनसंयुगे श्रुत्वानिहतमाचार्य्यमश्वत्थामाकिम
ब्रवीत धृष्टद्युम्नस्ययोमृत्युःसृष्टस्तेनमहात्मना यथाद्रोणस्यपांचाल्योयज्ञसेनसुतोभवत तंनृशंसेनपापेनक्रूरेणादीर्घ
दर्शिना श्रुत्वानिहतमाचार्यमश्वत्थामाकिमब्रवीत द्रोणपर्वणि संजयउवाच छद्मनानिहतंश्रुत्वापितरंपापकर्म्मणा बा
ष्पेणापूर्यतद्रौणीरोषेणाचनरर्षभ तस्यक्रुद्धस्यराजेंद्रवपुर्दीप्तमदृश्यत अंतकस्येवभूतानिजिहीर्षोःकालपर्य्यये
तोयपूर्णेततोनेत्रेअपमृज्यपुनःपुनः उवाचकोपान्निश्वस्यदुर्योधनमिदंवचः पितामममयथाक्षुद्रैर्न्यस्तशस्त्रोनिपाति
तः धर्मध्वजवतापापंकृतंतद्विदितंमम अनार्यस्यनृशंसस्यधर्मपुत्रस्यमेश्रुतं युद्धेष्वपिप्रवृत्तानांध्रुवंजयपराजयौ श्रीराम०

२४१

इयमेतस्वैद्विजनवधस्तत्रप्रशस्यते न्यायवृत्तोवधोयस्तुसंग्रामेयुध्यतोभवेत् नसदुःखायभवतितथादृष्टोहिसद्विजैः गतः
सवीरलोकायपितामममनसंशयः नशोच्यःपुरुषव्याघ्रस्तदानिधनंगतः यत्तुधर्मप्रवृत्तःसन्केशग्रहम
वाप्तवान् पश्यतांसर्वसैन्यानांतन्मेमर्म्माणिकृंतति मयिजीवतियत्तातःकेशग्रहमवाप्तवान् कथमन्येकरिष्यंति
पुत्रेभ्यःपुत्रिणःस्पृहां कामात्क्रोधादविज्ञानाद्दर्पाद्बाल्येनवापुनः वैधर्मिकाणिकुर्वंतितथापरिभवंतिच तदिदं
पार्षतेनेहमहदाधर्मिकंकृतं अवज्ञायचमांनूनंनृशंसेनदुरात्मना तस्यानुबंधंद्रष्टासौधृष्टद्युम्नःसुदारुणं अकार्यं
परमंकृत्वामिथ्यावादीचपांडवः योह्यसौछद्मनाचार्यंशस्त्रंसंन्यासयत्तदा तस्याद्यधर्म्मराजस्यभूमिःपास्यतिशो
णितं शपेसत्येनकौरव्यइष्टापूर्त्तेनचैवह अहत्वासर्वपांचालान्जीवेयंनकथंचन सर्वोपायैर्यतिष्यामिपांचा
लानामहंवधे धृष्टद्युम्नंचसमरेहंताहंपापकारिणं कर्म्मणायेनतेनेहमृदुनादारुणेनच पांचालानांवधंकृत्वाशां
तिंलब्धास्मिकौरव यदर्थंपुरुषव्याघ्रपुत्रानिच्छंतिमानवाः प्रेत्यचेहचसंप्राप्तुंत्राणंतेमहतोभयात् पित्रातुमम
सावस्थाप्राप्तानिर्बंधुनायथामयिशैलप्रतीकाशेपुत्रेशिष्येचजीवति धिग्ममास्त्राणिदिव्यानिधिग्बाहूधिक्परा
क्रमं यन्मांद्रोणःसुतंप्राप्यकेशग्रहमवाप्तवान् सतथाहंकरिष्यामियथाभरतसत्तम परलोकगतस्यापिगमिष्या
म्यनृणःपितुः आर्येणहिनवक्तव्याकदाचित्स्तुतिरात्मनः पितुर्वधममृष्यंस्तुवक्ष्याम्यद्येहपौरुषं अद्यप
श्यंतुमेवीर्यंपांडवाःसजनार्दनाः मृद्नतःसर्वसैन्यानियुगांतमिवकुर्वतः नहिदेवानगंधर्वानासुरानचराक्षसाः
अद्यशक्तारणेजेतुंरथस्थंमांनरर्षभ मदन्योनास्तिलोकेस्मिन्नर्जुनाद्वास्त्रवित्क्वचित् अहंहिज्वलतांमध्येमयूखा
नामिवांशुमान्प्रयोक्तादेवसृष्टानामस्त्राणांपृतनागतः॥ मयाद्यमिथसनादधमस्त्रप्रयुक्ताःमहाहवे दर्शयंतःशरावीर्यं

 प्रमाथिष्यंति पांडवान् अथ सर्वा दिशो राजन्धाराभिरिव संवृताः आहताः पत्रिभिस्तीक्ष्णैर्द्रष्टारो मामकैरिह विकिरन्शरजा
 लानि सर्वतो भैरवस्वनान् शत्रून्निपातयिष्यामि महावातद्रुमान् न हि जानाति बीभत्सुस्तदस्त्रं न जनार्दनः न भीमसेनो
न यमौ न च राजा युधिष्ठिरः न पार्षतो दुरात्मासौ न शिखंडी न सात्यकिः यदिदं मयि कौरव्य सकल्पमनिवर्तनं नारायणाय
मे पित्रा प्रणम्य विधिपूर्वकं उपहारः पुरा दत्तो ब्रह्मरूप उपस्थितः तं स्वयं प्रतिगृह्याथ भगवान्स वरं ददौ वव्रे पिता मे प
रमं मस्त्रं नारायणं ततः अथैनमब्रवीद्राजन्भगवान्देवसत्तमः भविता त्वत्समो नान्यः कश्चिद्युधि नरः क्वचित् न त्वि
दं सहसा ब्रह्मन्प्रयोक्तव्यं कथंचन न ह्येतदस्त्रमन्यत्र वधाच्छत्रोर्निवर्तते न चैतच्छक्यते ज्ञातुं केन वध्येदिति प्रभो अ
वध्यमपि हन्याद्धि तस्मान्नैतत्प्रयोजयेत् अथ संख्ये रथस्यैव शस्त्राणां च विसर्जने प्रयाचतां च शत्रूणां गमनं शरणस्य च
एते प्रशमने योगा महास्त्रस्य परंतप सर्वथा पीडितो हिंस्यादवध्यानपि पीडयन्रणे तच्च जग्राह पिता मत्तमब्रवीच्चैव स प्रभुः त्वं
वर्षिष्यसि शरवर्षाणि शस्त्रवर्षाण्यनेकशः अनेनास्त्रेण संग्रामे तेजसा च ज्वलिष्यसि एवमुक्त्वा स भगवान्दिवमाचक्रमे प्रभुः
एतन्नारायणादस्त्रं तत्प्राप्तं मम बंधुना तेनाहं पांडवांश्चैव पांचालान्मत्स्यकेकयान् विद्रावयिष्यामि रणे शचीपतिरिवासु
रान् यथा यथाहमिच्छेयं तथा भूत्वा शरा मम निपतेयुः सपत्नेषु विक्रमत्स्वपि भारत यथेष्टमश्मवर्षेण प्रवर्षिष्ये पुनः पुनः
अयोमुखैश्च विहगैर्द्रावयिष्ये महारथान् परश्वधांश्च निशितान्नुत्स्रक्ष्येहमसंशयं सोहं नारायणास्त्रेण महता शत्रुतापन
शत्रून्विध्वंसयिष्यामि कदर्थीकृत्य पांडवान् मित्रब्रह्मगुरुद्वेही जाल्मकः सुविगर्हितः पांचालापसदः सोद्य न मे जीवन्विमो
क्ष्यते तच्छ्रुत्वा द्रोणपुत्रस्य पर्यवर्तत वाहिनी ततः सर्वे महाशंखान्दध्मुः पुरुषसत्तमाः भेरीश्चाभ्यहनन्हृष्टा डिंडिमांश्च सह
सु २ स्रशः तथा ननाद वसुधा खुरनेमिप्रपीडिता स शब्दः सुमहांस्तूर्णं दिवं खं पृथिवीं च व्यनादयत् तं शब्दं पांडवाः श्रुत्वा पर्जन्यनिनदोपमं स
मेत्य रथिनां श्रेष्ठाः सहिताश्चाथ मंत्रयन् तथोक्त्वा द्रोणपुत्रस्तु वार्युपस्पृश्य भारत प्रादुश्चकार तद्दिव्यमस्त्रं नारायणं तदा महा 
भारते द्रोणपर्वणि ॥ ॥ 

संजयउवाच प्रादुर्भूतंततस्तस्मिन्नस्त्रेनारायणेप्रभो प्रावात्सपृषतोवायुरनभ्रेस्तनयित्नुमान् चचालपृथिवीचापिचु
क्षुभेचमहोदधिः प्रतिस्रोतःप्रवृत्ताश्चगंतुंतत्रसमुद्रगाः शिखराणिव्यशीर्यंतगिरीणांतत्रभारत अपसव्यंमृगाश्चैव
पांडुसेनांप्रचक्रिरे तमसादिशोन्वकीर्यंतसूर्यश्चकलुषोभवत् संपतंतिचभूतानिक्रव्यादानिप्रहृष्टवत् देवदानवगं
धर्वास्त्रस्तास्त्वासन्विशांपते कथंकथाभवत्तीव्रादृष्ट्वातद्व्याकुलंमहत् व्यथिताःसर्वराजानस्त्रस्ताश्चासन्विशांपते त
दृष्ट्वाघोरस्वरूपंवैद्रोणपुत्रस्त्रंभयावहं धृतराष्ट्रउवाच निवर्तितेषुसैन्येषुद्रोणपुत्रेणसंयुगे भृशंशोकाभितप्तेनपितु
र्वधममृष्यता कुरूनाभिपततोदृष्ट्वाधृष्टद्युम्नस्यरक्षणे कोमंत्रःपांडवेष्वासीत्तन्ममाचक्ष्वसंजय संजयउवाच प्रागे
वविद्रुतान्दृष्ट्वाधार्तराष्ट्रान्युधिष्ठिरः पुनश्चतुमुलंशब्दंश्रुत्वार्जुनमथाब्रवीत् युधिष्ठिरउवाच आचार्ये
निहतेद्रोणेधृष्टद्युम्नेनसंयुगे निहतेवज्रहस्तेनयथावृत्रेमहासुरे नाशंसंतजयंयुद्धेदीनात्मानोधनंजय
आत्मत्राणेमतिंकृत्वाप्राद्रवन्कुरवोरणात् केचिद्भ्रांतैरथैस्तूर्णंनिहतैः पार्ष्णियंतृभिः विपताकध्वजच्छ
त्रैःपार्थिवाःशीर्णकूबरैः भग्ननीडैराकुलाश्वैःप्राकृष्टानोविचेतसः भग्नाक्षयुगचक्रैश्चआकृष्यंतभयंततः रथा
न्विशीर्णांस्तुरंगपृष्ठैः केचिच्चविद्रुताः हयपृष्ठगताश्चान्येकृष्यंतेर्धच्युतासनाः गजस्कंधेषुसंस्यूतानाराचै
श्चलितासनाः शरार्तैर्विद्रुतैर्नागैःकृताःकेचिद्दिशोदश विशस्त्रकवचाश्चान्येवाहनेभ्यःक्षितिंगताः संछिन्नाने
मिभिश्चैवमर्दिताश्चहयद्विपैः क्रोशंतस्तातपुत्रेतिपलायंतेपरेभयात् नाभ्यजानंतचान्योन्यंकश्मलाभिहतौजसः
पुत्रान्पितॄन्सखीन्भ्रातॄन्समारोप्यदृढक्षतान् जलेनक्लेदयंत्यन्ये विमुच्यकवचान्यपि अवस्थांतादृशींप्राप्यह

द्रो० तेद्रोणेहृतंचलं पुनरावर्त्तितंकेनयदिजानासिमेंसमे हयानांहेषतांशब्दः कुंजराणांचबृंहतां रथनेमिस्वनै
२४३ श्चात्रविमिश्रः श्रूयतेमहान् एतंशब्दंभृशंतीव्राः प्रवृत्ताःकुरुसागरे मुहुर्मुहुरुदीर्यंतेकंपयंत्यपिमामकान्
यएषतुमुलःशब्दः श्रूयतेलोमहर्षणः सेंद्रानप्येषलोकांस्त्रीन्ग्रसेदितिमतिर्मम मन्येवज्र धरस्यैषनिना
दोभैरवःस्वनः द्रोणेहतेकौरवार्थंव्यक्तमभ्येतिवासवः प्रहृष्टरोमकूपाःस्मसंविग्नारथपुंगवाः धनंजयगुरुंश्रु
त्वातत्रनादंसुभीषणं कएषकौरवान्दीर्णानवस्थाप्यमहारथः निवर्त्तयतियुद्धार्थंमृधेदेवेश्वरोयथा अर्जु
नउवाच उद्यम्यात्मानमुग्रायकर्मणेवीर्यमास्थितः धमंतिकौरवाःशंखान्यस्यवीर्यमुपाश्रिताः यत्रतेसंशयोरा
२७ जन्मस्तस्त्रेगुरोहते धार्त्तराष्ट्रानवस्थाप्यकएषनदतीतिह श्रीमंतंतंमहाबाहुंमत्तद्विरदगामिनं व्याघ्रास्यमु
रामम ग्रकर्माणांकुरूणां अभयंकरं यस्मिन्जातेददौद्रोणोगवांदशशतंधनं ब्राह्मणेभ्योमहार्हेभ्यः सोश्वत्थामैषगर्जति
जातमात्रेणवीरेणयेनोच्चैःश्रवसायथा हेषताकंपिताभूमिर्लोकाश्चसकलास्त्रयः तच्छ्रुत्वांतर्हितंभूतंनामतस्या
करोत्तदा अश्वत्थामेतिसोद्यैषशूरोनदतिपांडव योद्यनाथइवाक्रम्यपार्षतेनहतस्तथा कर्मणासुनृशंसेनत
स्यनाथोव्यवस्थितः गुरुंमेयत्रपांचाल्यःकेशपक्षेपरामृशत् तत्रजातुक्षमेद्द्रौणिर्जानन्पौरुषमात्मनः उ
पचीर्णोगुरुर्मिथ्याभवताराज्यकारणात् धर्मज्ञेनसतानामसोधर्म्मःसुमहान्कृतः चिरंस्थास्यतिवाकीर्त्ति
स्त्रैलोक्येसचराचरे एवमेवालिवधाद्यथादैवंद्रोणेनिपातिते सर्वधर्मोपपन्नोयंसमेशिष्यश्चपांडवः नायं श्रीराम०
वक्ष्यतिमिथ्येतिप्रत्ययंकृतवांस्त्वयि सत्यकंचुकंनामप्रविष्टेनततोनृतं ॥ २ २ ४ २४३

आचार्य्यउक्तोभवताहतः कुंजरइत्युत ततः शस्त्रंसमुत्सृज्यनिर्ममोगतचेतनः आसीत्सविह्वलोराजन्यथादृष्टस्त्वयाविभुः सतु
शोकसमाविष्टोविमुखः पुत्रवत्सलः शाश्वतंधर्ममुत्सृज्य गुरुः शिष्येणघातितः न्यस्तशस्त्रमधर्मेणघातयित्वागुरुंभवान् रक्षत्वि
दानींसामात्योयदिशक्तोसिपार्षतं सौहार्दंसर्वभूतेषुयः करोत्यतिमानुषः सोद्यकेशग्रहंश्रुत्वापितुर्दुःख्यतिनोरणे विक्रोशमानेहि
मयिभृशमाचार्यगृद्धिनि अपाकीर्य्यस्वयंधर्मंशिष्येणनिहतोगुरुः यदागतंवयोभूयः शिष्टमल्पतरंचनः तस्येदानींविकारोयमधर्मोयं
कृतोमहान् पितेवनित्यंसौहार्दात्पितेवहिचधर्म्मतः सोल्पकालस्यराज्यस्यकारणाद्घातितोगुरुः धृतराष्ट्रेणभीष्मायद्रोणायचवि
शांपते विसृष्टापृथिवीसर्वासहपुत्रैश्चतत्परैः संप्राप्यतादृशींवृत्तिंसत्कृतः सततंपरैः वृणीतसततंपुत्रान्मामेवाभ्यधिकंगुरुः अवेक्षमा
णस्त्वांमांचन्यस्तास्त्रश्चाहवेहतः नत्वेनंयुध्यमानंवैहन्यादपिशतक्रतुः तस्याचार्यस्यवृद्धस्यद्रोहोह्येनित्योपकारिणः कृतोह्यनार्यैरस्मा
भीराज्यार्थेलघुबुद्धिभिः अहोवतमहत्पापंकृतंकर्म्मसुदारुणं यद्राज्यसुखलोभेनद्रोणोयंसाधुघातितः पुत्रान्भ्रातॄन्पितॄन्दारान्जी
वितंचैववासविः त्यजेत्सर्वंममप्रेम्णाजानात्येवहिमेगुरुः समयाराज्यकामेनहन्यमानोह्युपेक्षितः तस्मादवाक्शिराराजन्प्राप्तोस्मिनरकं
प्रभो ब्राह्मणंवृद्धमाचार्यंन्यस्तशस्त्रंयथामुनिं घातयित्वाद्यराज्यार्थंमृतंश्रेयोनजीवितं॥ ॥महाभारतेद्रोणपर्व्वणि संजयउ०
अर्जुनस्यवचः श्रुत्वानोचुस्तत्रमहारथाः अप्रियंवाप्रियंवापिमहाराजधनंजयं ततः क्रुद्धोमहाबाहुर्भीमसेनोभ्यभाषत कुत्सयन्निवकौं

द्रो० तेयमर्जुनंभरतर्षभ मुनिर्यथारण्यगतोभाषसेधर्मसंहितं न्यस्तदंडोयथापार्थब्राह्मणः संशितव्रतः क्षत्रत्राताक्षताज्जीवनक्षंताङ्खीषपि
साधुषु क्षत्रियःक्षितिमाप्नोतिक्षत्रंधर्मंयशः श्रियः सभवानक्षत्रियगुणैर्युक्तः सर्वैकुलोद्वहः अविपश्चिद्यथावाचंव्याहरन्नाद्यशोभसे
पराक्रमस्तेकौंतेयशक्रस्येवशचीपतेः नचातिवर्त्तसेधर्मंवेलामिवमहोदधिं [redacted] नवैस्मरसितद्दुःखंत्रयोदशवार्षिकं अमर्ष
२५५ दृष्टतः क्षत्वाधर्ममेवाभिकांक्षसे दिष्ट्यातातमनस्तेद्यत्वधर्ममनुवर्त्तते आनृशंस्यंचतेदिष्ट्याबुद्धिः सततमच्युत यत्रधर्मेप्रहर्त्तस्तद्वंतरा
त्मभधर्मतः द्रौपदीवपरामृष्टासभामानीयशत्रुभिः वनंप्रव्राजिताश्चस्मवल्कलाजिनवासमः अनर्हमाणास्तंभावंत्रयोदशसमापरैः
एतान्यमर्षस्थानानिमर्षितानिमयानघक्षत्रधर्मप्रसक्तेनसर्वमेतदनुष्ठितं तमधर्ममपाकृष्टुंस्मृत्वाद्यसहितस्त्वया सानुबंधान्हनिष्यामि
क्षुद्रान्राज्यहरानहं त्वयाहिकथितंपूर्वंयुद्धायाभ्यागतावयं घटामहेयथाशक्तित्वंतुनोद्यजुगुप्ससे धर्ममिवेच्छसिज्ञातुं मिथ्यावचनमे
वते भयार्द्दितानामस्माकंवाचामर्माणिकृंतसि वपनव्रणेक्षारमिवक्षतानांशत्रुकर्शन विदीर्यतेमेहृदयंत्वयावाक्छल्यपीडितं अ
धर्ममेनंविपुलंधार्मिकः सन्नबुध्यसे यत्त्वमात्मानमस्मांश्चप्रशंस्यान्नप्रशंससि वासुदेवेस्थितेचापिद्रोणपुत्रंप्रशंससि यःकलांषोड
शींपूर्णांधनंजयनतेर्हति स्वयमेवात्मनोदोषान्ब्रुवाणः किंनलज्जसे दारयेयंमहींक्रोधाद्विकिरेयंचपर्वतान् आविध्येतांगदांगुर्वीभीमा २५५
कांचनमालिनीं गिरिप्रकाशान्क्षितिजानभंजेयमनिलोयथा [redacted] येयंशरांश्चापिसेंद्रान्देवान्समागतान स १५०

२१ नवमी

राज्ञः सगणाम्पार्थसात्स्वरोगमौन सत्वमेवं विधंज्ञानन्भ्रातरंमांनरर्षभ द्रोणा पुत्रा इष्टंकर्त्तुंनार्हसिस्मिनविक्रम अथवातिष्टबीभत्सो
तहसर्वैः सहोदरैः अहमेवंनेगणपाणिनैष्यामेकोमहाहवे ततः पांचालराजस्यपुत्रः पार्थमथाब्रवीत संकृद्धमिवहृतेहिरण्यकशिपुर्हरिं
धृष्टद्युम्नउवाच बीभत्सोविप्रकर्माणि विदितानिमनीषिणां याजनाध्यायनेदानंतथायज्ञप्रतिग्रहौ षष्टमध्यापनंनामतेषांकस्मिन्प्रति रा०८
ष्टितः हतोद्रोणोमयायेवंकिंमांपार्थविगर्हसे अपक्रांतः स्वधर्म्माच्च क्षात्रंधर्ममपाश्रितः अमानुषेणहंत्यस्मानस्त्रेणक्रुद्धकर्म्मकृत तथा
मायांप्रयुंजानमसह्यंब्राह्मणब्रुवं मायपैवनिहन्याद्योनपुक्तंपार्थतत्रकिं तस्मिंस्तथामयाशस्तेपरिद्रोणायनीरुजा कुरुतेभैरवंनादंतत्रकिं ६५
महीयते नचाद्भुतमिदंमन्येपद्रौणीर्युद्धगर्जया घातयिष्यतिकौरव्यानपरित्रातमशक्नवन यच्चमांधार्मिकोभूत्वाब्रवीषिगुरुघातिनं तदर्थ
महमुत्पन्नः पांचालस्यसुतोनलात यस्यकार्यमकार्यंवायुध्यतः स्यात्समंरणे तंकथंब्राह्मणंब्रूयाः क्षत्रियंवाधनंजय योह्यनस्त्रविदो
हन्याद्ब्रह्मास्त्रैः क्रोधमूर्छितः सर्वोपायैर्न्नसकथंवध्यः पुरुषसत्तमः विधर्मिणंधर्मविद्भिःप्रोक्तंतेषांविषोपमं जाननधर्मार्थतत्वज्ञ किंमा
मर्जुनगर्हसे नृशंसः सम्पाक्रम्यरथएवनिपातितः तन्मामभिनिंद्यंबीभत्सोकिमर्थंनाभिनंदसि कालानलसमंपार्थज्वलनार्कविषोप
मं भीमंद्रोणशिरश्छिन्नंनप्रशंससिमेकथं योसौममैवनान्यस्यबांधवानयुधिजघ्निवान छित्वापितस्यमूर्द्धानंनैवास्मिविगतज्वरः तच्चमेकृं
ततेमर्मयन्नतस्यशिरोमया निषादविषयेक्षिप्तंजयद्रथशिरोयथा अवधस्तपिशत्रूणामधर्मः श्रूयतेर्जुनक्षत्रियस्यहिधर्मोयंहन्याद्धन्येतवा

पुनः स शत्रुर्निहतः संख्ये मया धर्मेण पांडव यथा त्वया हतः शूरो भगदत्तः पितुः सखा पितामहं रणे हत्वा मन्यसे धर्ममात्मनः मया शत्रौ हते
कस्मात्पापे धर्मेन मन्यसे संबंधावनतं पार्थ न मां त्वं वक्तुमर्हसि स्वगात्रकृतसोपानं विषमस्थमिव द्विपं तिनं क्षमामि ते सर्वमेव वाग्व्यतिक्रमम् अर्जुन द्रौ
पद्या द्रोपदेयानां कृते नान्येन हेतुना कुलक्रमागतं वैरं माचार्येण विश्रुतं तथाज्ञानात्पर्यंलोकोन पूर्यं पांडुनेदृनाः नानृती पांडवो ज्येष्ठो ना
हं वा धार्मिकोऽर्जुन शिष्यद्रोही हतः पापो युध्यस्व विजयं तव महाभारते द्रोणपर्वणि ॥ ॥ धृतराष्ट्र उवाच सांगा वेदा यथान्यायं येनाधीता
महात्मना यस्मिन्साक्षाद्धनुर्वेदो ह्रीनिषेवे प्रतिष्ठितः तस्मिन्नाक्रुश्यति द्रोणे महर्षितनये तदा नीत्यनान्नृशंसेन क्षुद्रेण गुरुघातिना यस्य
प्रसादात्कुर्वंति कर्माणि पुरुषर्षभाः अमानुषाणि संग्रामे देवैरसुकराणि च तस्मिन्नाक्रुश्यति द्रोणे समक्षं पापकर्मणा नामर्षं तत्र कु
र्वंति धिक्क्षात्रं धिगमर्षितां पार्थाः सर्वे च राजानः पृथिव्यां ये धनुर्धराः श्रुत्वा किमाहुः पांचाल्यं तन्ममाचक्ष्व संजय संजउ० श्रुत्वा द्रुपदपुत्र
स तावाचः क्रूरकर्मणः तूष्णीं बभूवू राजानः सर्व एव विशांपते अर्जुनस्तु कटाक्षेण जिह्मं प्रेक्ष्य च पार्षतं सबाष्पमभिनिःश्वस्य धिग्धि
गित्येव चाब्रवीत् युधिष्ठिरश्च भीमश्च यमौ कृष्णस्तथा परे आसन्सुव्रीडिता राजन्सात्यकिस्त्वब्रवीदिदं नेहास्ति पुरुषः कश्चिद्य इमं पापपूरु
षं भाषमाणमकल्याणं शीघ्रं हन्यान्नराधमं एते त्वां पांडवाः सर्वे कुत्सयंति विविंसया कर्मणा तेन पापेन श्वपाकमिव ब्राह्मणाः एतत्कृत्वा 
महत्पापं निंदितः सर्वसाधुभिः न लज्जसे कथं वक्तुं समिति प्राप्य शोभनं कथं च शतधा जिह्वा न ते मूर्धा विदीर्यते गुरुमाक्रोशतः क्षुद्र न चाधर्मेण पा पप्म०

त्मसे वाच्यस्त्वमसि पार्थेश्वस्तवैश्वाधवकदृष्मिभिः यत्कर्मकलुषंकृत्वाश्लाघसेजननसंसदि च्चकार्यैतादृशंकृत्वापुनरेवगुरुंक्षिपन् व
ध्यस्त्वंनत्वयार्थोस्तिमुहूर्तमपिजीवता कस्त्वंतद्यवसेदायस्त्वकृत्वः प्रस्त्वयाधम निगृह्यकेशेषुवधंगुरोर्ह्वमोन्मनःसतः सप्रावरेस्तथा
स्त्रैवेवाधवारेस्तं निमज्जिताः यशसावप्रित्यक्तास्त्वाप्राप्यकुलपांसन उक्तवांश्चापियत्पार्थभीष्मंप्रतिनरर्षभ तथांतोविहितस्तेनस्त
यमेवमहात्मना तस्यापितवसोदर्यो निहंतापापकृत्तमः नान्यः पांचालपुत्रेभ्यो विघ्नेभुविपापकृत्तस्मचापिसदृष्टः पित्र्यानेभीष्मस्यां
तकरःकिल शिखंडीशीघ्नितोनेनसचमृत्युर्महात्मनः पांचालाश्चलितावर्मातकुद्धामित्रगुरुद्रुहः त्वयाप्यसहमोदर्यैधिक्कृतंसर्व
साधुभिः पुनश्चेदीदृशींवाचंमत्समीपेवदिष्यति शिरस्तेपार्थपिष्यामिगदयावज्रकल्पया त्वांचवध्यंगांदृष्ट्वाजनः सूर्यमवेक्ष्य ते ब्र
हत्याहितेपापप्रायश्चित्तार्थमात्मनः पांचालकेश दुर्वृत्तममैवगुरुमध्य तः गुरोर्गुरुंचभूयोपिक्षिपन्नेवहलज्जसे तिष्ठतिष्ठसहस्वे
कोगदापातमिमंमम तवचापिहनिष्येहंगदापातानेकशः सात्वतेनेवमाक्षिप्तः पार्षतः प्रत्युवाचतं संरंभमान्यकिंप्राहसेकृद्धः
प्रहसन्निव धृष्टद्युम्नउवाच श्रूयतेश्रूयतेचेतिक्षम्यतेचेतिमाधव सदानार्योशुभःसाधुंपुरुषंक्षेप्तुमिच्छति क्षमाप्रशस्यतेलोकेन
तपोपार्हतिक्षमोक्षमावंतंहिपापात्माजितोयमितिमन्यते सत्वंक्षुद्रसमाचारोनीचात्मापापनिश्चयः आकेशाग्रान्नखाग्राच्च व
क्तव्योवक्तुमिच्छसि यस्तंभूरिश्रवाश्छिन्नभुजंप्रायगतस्त्वया वार्यमाणोनिहिहतस्ततःपापतरंनुकिं गाहमानोमयाद्रोणोदिव्ये

द्रो०
२८६

नान्येणसंयुगे विसृष्टशस्त्रः निहतः किंतत्क्रूरदुष्कृतं अयुध्यमानंयस्त्वाजौतथाप्रायगतंमुनिं छिन्नबाहुंपरैर्हीमान्सात्मकेस
कथंवदेत निकृत्यत्वांपदाभूमौसविकर्षतिवीर्यवान् किंतदान निहंस्येनंभूत्वापुरुषसत्तमः त्वयापुनरनार्य्येणपूर्वंपार्थेननिर्जि
तः यदातदाहतः शूरः सौमदत्तिः प्रतापवान् यत्रतत्रतुपांडूनांद्रोणोद्रावयतेचमूं किरंछरसहस्राणितत्रतत्रप्रयाम्यहं सत्व
मेवंविधंकृत्वाकर्मचांडालवत्त्वयं वक्तुमर्हसिवक्तव्यः कस्मान्मांपरुषाण्यथ कर्त्तात्वंकर्म्मणोऽस्यस्यनाहंवैवृष्णिकुलाधम पापानां
चत्वमावासः कर्म्मणांमापुनर्वद जोषयत्वनमांभूयोवक्तुमर्हस्यतः परं अधरोत्तरमेतद्धियन्मांत्वंवक्तुमर्हसि अथवक्ष्यसिमां
मौर्ख्यात्तिभूयः परुषमीदृशं गमयिष्यामिवाणैस्त्वांयुधिवैवस्वतक्षयं नचैवंमूढधर्म्मेणकेवलेनैवशक्यते तेषांमपित्वधर्म्मेण
चेष्टितंशृणुयादृशं वंचितः पांडवः पूर्वमधर्म्मेणयुधिष्ठिरः द्रौपदीचपरिक्लिष्टातथाधर्म्मेणसात्यके प्रव्राजितावनेसर्वेपांडवाः सह
कृष्णया सर्वस्वमपकृष्टंचतथाधर्म्मेणबालिशः अधर्म्मेणापकृष्टश्चमद्रराजः परैरितः अधर्म्मेणतथाबालः सौभद्रोविनिपातितः
इतोप्यधर्म्मेणहतोभीष्मः परपुरंजयः भूरिश्रवास्त्वधर्म्मेणत्वयाधर्मविदाहतः एवंपरैराचरितंपांडवेयैश्चसंयुगे रक्षमाणैर्जयंवीरैर्ध २८६
र्म्मज्ञैरपिसात्वत दुर्ज्ञेयः परमोधर्म्मश्चदुर्विदः युध्यस्वकौरवैः माऽहंमागाः पितृनिवेशनं संजयउवाच एवमादीनिवाक्यानिक्रूरा
णिपरुषाणिच श्रावितः सात्यकिःश्रीमानकंपितइवाभवत् तच्छ्रुत्वाक्रोधताम्राक्षः सात्यकिस्त्वाददेगदां विनिश्वस्ययथासर्पः प्रणि राम०

५६१

परवल्मयषवदिमाःपांचाल्येभ्यश्चमारिष तथैवांधकवृष्णिभ्यः तथैवयविशेषतः कृतंसस्यप्यपास्मन्नोमित्रमन्यन्नविद्यते ४

धावन्रथेधनुः ततोभिपत्यपांचाल्यंसंरंभेणेदमब्रवीत् नत्वावक्ष्यामिपरुषंहनिष्येत्वांवधक्षमं तमापतंतंसहसामहाबलममर्षणं
पांचाल्यायाभिसंक्रुद्धमंतकायांतकोपमं चोदितोवासुदेवेनभीमसेनोमहाबलः अवप्लुत्यरथात्तूर्णंबाहुभ्यांसमवारयत् द्रवमाणंतथा
क्रुद्धंसात्यकिंपांडवोबली प्रस्कंदमानमादायजगामबलिनंबलात् स्थित्वाविष्टभ्यचरणौभीमेनशिनिपुंगवः निगृहीतःपदेषष्ठेबलेन
बलिनांवरः अवरुह्यरथात्तूर्णंध्रियमाणंबलीयसा उवाचश्लक्ष्णयावाचासहदेवोविशांपते अस्माकंपुरुषव्याघ्रमित्रमन्यन्नविद्यते
पांचालानांववाहेभ्यसमुद्रांतांविचित्वतां नान्यदस्तिपरंमित्रंयथापांडववृष्णयः समभवानीदृशंमित्रंमन्येपृथुवत्तथातव भवंतश्चतथास्माकं
भवंतांचतथावयं सत्वंसर्वधर्मज्ञमित्रधर्ममनुस्मरन् नियच्छमन्युंपांचाल्यात्प्रशाम्यशिनिपुंगव पार्षतस्यक्षमस्वत्वंक्षमतांपार्षतस्तव
ते वयंक्षमयितारश्चकिमन्यत्रशमाद्भवेत् प्रशाम्यमानेशैनेयेसहदेवेनमारिष पांचालराजस्यसुतःप्रहसन्निदमब्रवीत् मुंचमुंचशिनेःपौ
त्रंभीमयुद्धमदान्वितं आसादयतुमामेषधराधरमिवानिलः यावदस्याशितैर्बाणैःसंरंभंविनयाम्यहं युद्धश्रद्धांचकौंतेयजीवितंचास्यसंयुगे
किंनुशक्यंमयाकर्तुंकार्यंयदिदमुद्यतं सुमहत्पांडुपुत्राणामायांत्येवहिकौरवाः अथवाफाल्गुनःसर्वान्वारयिष्यतिसंयुगे अहमप्यस्यमूर्द्धानं
पातयिष्यामिसायकैः मन्यतेछिन्नबाहुंमांभूरिश्रवसमाहवे उद्यतेनमहेवेनमेयवामांहनिष्यति शृण्वन्पांचालवाक्यानिसात्यकिःस
र्पवच्छ्वसन् भीमबाह्वंतरेसक्तोविस्फुरत्यनिशंबली तौवृषाविवनर्दंतौबलिनौबाहुशालिनौ त्वरयावासुदेवश्चधर्मराजश्चमारिष यत्नेनमह

४

द्रो० तावीरौवारया मासतुस्ततः निवार्यपरमेष्वासौकोपसंरक्तलोचनौ युयुत्सनपरानमंत्मेप्रतिपुःक्षत्रियर्षभाः॥ ॥इतिद्रोणपर्वणि
२५७ संजयउवाच ततः सकर्णंचक्रेशिष्टांद्रोणानंदनः पुर्गांतेसर्वभूतानांकालसृष्टइवांतकः ध्वजद्रुमंशस्त्रशृंगंहतनागमहाशिलं अ
श्वकिंपुरुषाकीर्णंशरासनलतावृतं क्रव्यादपक्षिसंघुष्टंभूतयक्षगणाकुलं निहत्यशात्रवानभद्रेः सोविनोद्दृहपर्वतं ततोवेगेनम
हताविनद्यसनरर्षभ प्रतिज्ञांश्रावयामासपुनरेवतवात्मजं यस्माद्युध्यंतमाचार्यंधर्मकंचुकमास्थितः मुंचशस्त्रमितिप्राहकुंतीपुत्रो
युधिष्ठिरः तस्मात्संपश्यतस्तस्यद्रावयिष्यामिवाहिनीं विद्राव्यसर्वान्हंतास्मिजाल्मंपांचाल्यमेवतु सर्वानेतान्हनिष्यामियदियो
त्स्यंतिमांरणे सत्यंतेप्रतिजानामिपरिवर्तयवाहिनीं तच्छ्रुत्वपुत्रस्तववाहिनींपर्यवर्तयत् सिंहनादेनमहतान्यपोह्यसुमहद्भयं त
तः समागमोराजन्कुरुपांडवसेनयोः पुनरेवाभवत्तीव्रः पूर्णसागरयोरिव संरब्धाहिस्थिरीभूताद्रोणपुत्रेणकौरवाः उदग्राःपांडु राम
पांचालाद्रोणस्यनिधनेनच तेषांपरमहृष्टानांजयमात्मनिपश्यतां संरब्धानांमहावेगः प्रादुरासीद्विशांपते यथाशिलोच्चयेशै
लः सागरः सागरेयथा प्रतिहन्यतराजेंद्रतथासन्कुरुपांडवाः ततः शंखसहस्राणिभेरीणामयुतानिच अवादयंतसंहृष्टाः कुरु २५७
पांडवसैनिकाः ततोनिर्मथ्यमानस्यसागरस्येवनिःस्वनः अभवत्तवसैन्यस्यसुमहानद्भुतोपमः प्रादुश्चक्रेततोद्रौणिरस्त्रंनारायणं
तदा अभिसंधायपांडूनांपांचालानांचवाहिनीं प्रादुरासंस्ततोबाणादीप्ताग्राःखेसहस्रशः पांडवान्क्षपयिष्यंतोदीप्तास्याः पन्नगाइवते एम·

दिशः एवं वै सैन्यं व समाहरावन्महाहवे मुहूर्त्ताद्द्रावकारसेवलोकोराजन्नगमत्क्षयः तथापरे घोनमानाम्पोतीषीवामलेवरे प्राद्रवन्महाराज
काम्भोयसमपागुडाः चतन्सूक्ष्मकादिव्यकास्सुशत घोथहूडगगहाः वक्राणिव क्रूरं तानि मंडलानीव भास्वतः शस्त्राक्रा तिमिराकीर्णमती।
व पुरुषर्षभ दृष्ट्वांत गिक्रमा विघ्नाः पांडुपांचालसृंजयाः यथापथास्थपुध्यंतं पाडवानां महारथाः तथा तथा तदस्त्रं वैव्य वर्द्धत जनाधिप व
ध्यमानास्तदा द्रोणात ननारायणेनवै दृह्यमानानलेनैव सर्वतोभ्यर्द्दिता रणे यथा हि शिशिरापाये दहेत्कक्षं हुताशनः तथा तदस्त्रं पांडूनां
ददाहस्त्व जितोप्रभो आपूर्यमाणेनास्त्रेण सैन्ये क्षीयति च प्रभो जगाम परमं त्रासं धर्मपुत्रो युधिष्ठिरः द्रवमाणं ततस्तैन्यं दृष्ट्वा विगतचेत
नं मध्यस्थतां च पार्थस्य धर्मपुत्रोब्रवीदिदं धृष्टद्युम्नपलायस्व सह पांचालसेनया सात्यके त्वं च गच्छस्व वृष्ण्यंधकवृतो महान वासुदे
वोपि धर्मात्मा करिष्यत्यात्मनः क्षमं श्रेयो ह्युपदिशत्येव लोकस्य किमुतात्मनः संग्रामस्तु न कर्तव्यः सर्वसैन्यान्ब्रवीमि वः अहं हि सहसोद
र्यैः प्रवेक्ष्ये हव्यवाहनं भीष्मद्रोणार्णवं तीर्त्वा संग्रामे भीरुदुस्तरं विमज्जिष्यामि सलिले सगणो द्रोणगोष्पदे कामः संपद्यताम स्यवीभ
त्सोराशुभं प्रति कल्याणवृत्तो ह्याचार्यो मया युधि निपातितः येन बालः समीभद्रो युद्धानामविशारदः समर्थैर्बहुभिः क्रूरैर्घातितो नाभिपालि
तः येन विब्रुवती प्रश्नं तथा कृष्णा सभागता उपेक्षिता पुत्रेणादासभावं नियच्छती जिघांसद्धान्तिराङ्गस्यश्रांतेषु प्रश्वेषु फाल्गुनः कवचेन त
था गुप्तोरक्षार्थं सैंधवस्य च येन ब्रह्मास्त्रविदुषा पांचालाः सत्यजित्प्रमुखाः कुर्वाणा मज्जये यत्नं समूला विनिपातिताः येन प्रव्राज्यमा

द्रो०
२५८

नाश्वरम्याद्दयमधर्मितः निवार्यमाणानवधेनानुपातात्तैर्दृषिणाः सोमावत्समेतेस्मात्सकुवीराः सोल्हृदपरं हनस्तदस्त्रमरणां गमिष्या
मिसबांधवः एवंब्रुवति कौंतेये दाशार्हस्त्वरितस्ततः निवार्य सैन्यं वाहुभ्यामिदं वचनमब्रवीत शीघ्रं न्यस्यत शस्त्राणि वाहेभ्यश्चावरोहत ए
षयोगोत्रविहितः प्रतिषेधे महात्मना द्विपांश्च स्यंदनेभ्यश्च क्षितिं सर्वेवरोहत एवमेतन्नवो हन्यादस्त्रं भूमौ निरायुधान यथायथा हि युध्यंते
योधास्त्वस्त्रमिदं प्रति तथातथा भवंत्येते कौरवा वलवत्तराः निक्षेप्स्यंति च शस्त्राणि वाहनेभ्यो वरुह्य ये तान्नैतदस्त्रं संग्रामे निहनिष्य
ति मानवान ये त्वेतत्प्रतियोत्स्यंति मनसापीह केचन निहनिष्यंति तान्सर्वान्रसातलगतानपि ते वचस्तस्य तच्छ्रुत्वा वासुदेवस्य भार
त इयेषुः सर्वे समुत्स्रष्टुं मनोभिः करणेन च ततउत्स्रष्टुकामांस्तानस्त्राण्यालक्ष्य पांडवः भीमसेनोब्रवीद्राजन्निदं संहर्षयन्वचः न कथंच
न शस्त्राणि मोक्तव्यानीह केनचित अहमावारयिष्यामि द्रोणपुत्रास्त्रमाशुगैः अथवाप्यनया गुर्व्या हेमविग्रहया रणे कालवत्संहरिष्या
मि द्रौणेरस्त्रं विशातयन नहि मे विक्रमे तुल्यः कश्चिदस्ति पुमानिह यथैव सवितुस्तुल्यं ज्योतिरन्यन्न विद्यते पश्यतेमौ हि मे वाहू ना
गराजकरोपमौ समर्थौ पर्वतस्यापि शैशिरस्य निपातने नागायुतसमप्राणो ह्यहमेको नरोष्विह यथा प्रतिद्वंद्वो दिवि देवेषु विश्रुतः अ
द्य पश्यत मे वीर्यं वाह्वोः पीनांसयोर्युधि ज्वलमानस्य दीप्तस्य द्रौणेरस्त्रस्य वारणे यदि नारायणास्त्रस्य प्रतियोद्धा न विद्यते अद्यैतत्प्रति
योत्स्यामि पश्यत्सु कुरुपांडुषु अर्जुनार्जुन वीभत्सो न न्यस्यं गांडिवं त्वया शशांकस्येव ते कोपं नैर्मल्यं पातयिष्यति अर्जुनउवाच॥ राम

नया ५ पया ३

भीमनारायणास्त्रेमेगोषुचव्राह्नेणोषुच एतेयुगांडिवेंनस्यमेनहिद्धिनमुत्तमं एवंमुक्तस्ततोभीमोद्रोणपुत्रमरिंदमं अभ्ययान्मेघ
घोषेणरथेनादित्यवर्च्चसा सएनमिषुजालेनलघुत्वाच्छीघ्रविक्रमः निमेषमात्रेणासाद्यकुंतीपुत्रोभ्यवाकिरत् ततोद्रौणिः प्र
हस्यैनंद्रवंतमभिभाष्यच अवाकिरत्प्रदीप्ताग्रैः शरैस्तैरभिमंत्रितैः पन्नगैरिवदीप्तास्यैर्वमद्भिर्ज्वलनंरणे अवकीर्णोभवत्पार्थः
स्फुलिंगैरिवकांचनैः तस्यरूपमभूद्राजनभीमसेनस्यसंयुगे खद्योतैरावृतस्येवपर्वतस्यदिनक्षये तदस्त्रंद्रोणपुत्रस्यतस्मिन्प्रति
समस्यति अवर्द्धतमहाराजयथाग्निरनिलोद्धतः विवर्द्धमानमालक्ष्यतदस्त्रंभीमविक्रमं पांडुसैन्यमृतेभीमंसुमहद्भयमाविशत्
ततःशस्त्राणितेसर्वेसमुत्सृज्यमहीतले अवारोहन्रथेभ्यश्चहस्त्यश्वेभ्यश्चसर्वशः तेषुनिक्षिप्तशस्त्रेषुवाहनेभ्यश्च्युतेषुच तदस्त्रंवी
र्यविपुलंभीममूर्द्धन्यथापतत् हाहाकृतानिभूतानिपांडवाश्चविशेषतः भीमसेनमपश्यंततेजसासंवृतंतथा॥ ॥इतिमहा
भारतेद्रोणपर्वणि संजयउवाच भीमसेनंसमाकीर्णंदृष्ट्वास्त्रेणधनंजयः तेजसः प्रतिघातार्थंवारुणेनसमावृणोत् नाल
क्ष्यततंकश्चिद्वारुणास्त्रेणसंवृतं अर्जुनस्यलघुत्वाच्चसंवृतत्वाच्चतेजसः साश्वसूतरथोभीमोद्रोणपुत्रास्त्रसंवृतः अग्नाव
ग्निरिवसंन्यस्तोज्वालामालीसुदुर्दृशः यथारात्रिक्षयेराजन्ज्योतींष्यस्तगिरिंप्रति समापेतुस्तथाबाणा भीमसेनरथंप्रति सहि

द्रो०
२४५

भीमोरथश्चास्यहयाःसूतश्चमारिष संवृतोद्रोणपुत्रेणपावकांतर्गतोभवत् यथाजग्ध्वाजगत्कृत्स्नंशमयेत्सचराचरं यथावह्निर्विभो
रास्यंतथास्त्रंभीममावृणोत् सूर्यमग्निःप्रविष्टःस्याद्यथाचाग्निंदिवाकरः तथाप्रविष्टंतत्तेजो नप्राज्ञायतपांडवं विकीर्णमस्त्रंत
दृष्ट्वा तथाभीमरथंप्रति उदीर्यमाणंद्रौणिंचनिष्प्रतिद्वंद्वमाहवे सर्वसैन्यंचपांडूनांन्यस्तशस्त्रमचेतनं युधिष्ठिरपुरोगांश्चविमु
खांस्तान्महारथान् अर्जुनोवासुदेवश्चत्वरमाणौमहाद्युती अवप्लुत्यरथाद्वीरौभीममाद्रवतांततः ततस्तंद्रोणपुत्रस्यतेजोस्त्रबल
संभवं विगाह्यतौसुबलिनौमाययाविशतांतथा न्यस्तशस्त्रौततस्तौतुनादहत्सोस्त्रजोनलः वारुणास्त्रप्रयोगाच्चवीर्यवत्त्वाच्चकृष्ण
योः ततश्चकर्षतुर्भीमंसर्वशस्त्रायुधानिच नारायणास्त्रशांत्यर्थंनरनारायणौबलात् आकृष्यमाणःकौंतेयोनदत्येवमहारवं वर्द्धते
चैवतद्घोरंद्रौणेरस्त्रंसुदुर्जयं तमब्रवीद्वासुदेवः किमिदंपांडुनंदन वार्यमाणोपिकौंतेययद्युद्धान्ननिवर्त्तसे यदियुद्धेनजेयाःस्युरिमे
कौरवनंदनाः वयमप्यत्रयुद्ध्येमतथाचेमेनरर्षभाः रथेभ्यस्त्ववतीर्णाःस्मसर्वएवहितावकाः तस्मात्त्वमपिकौंतेयरथात्तूर्णमपाक्रम एवमुक्त्वाततःकृष्णोरथा ते
भूमिमवर्त्तयत् निःश्वसंतंयथानागंक्रोधसंरक्तलोचनं यदापकृष्टःसरथान्न्यासितश्चायुधंभुवि ततोनारायणास्त्रंतत्प्रशांतंशत्रुतापनं तस्मिन्प्रशांतेविधिनातेजसिदुःसहे व
भूवुर्विमलाःसर्वादिशःप्रदिशएवच प्रववुश्चशिवावाताःप्रशांतामृगपक्षिणः वाहनानिचहृष्टानिप्रशांतेस्त्रेसुदुर्जये व्यपोढेचततोघो
रेतस्मिंस्तेजसिभारत बभौभीमोनिशापायेधीमान्सूर्यइवोदितः हतशेषंबलंतत्रपांडवानाम ॥ ॥ ॥

राम०
२४५

जिष्वन अश्वत्थामपरमाद्दृष्टं नवपुत्रजिघांसया अवस्थिते च ते तस्मिन्नस्त्रेशक्तिहते तथा दुर्योधनो महाराज द्रोणपुत्रमथाब्रवीत् अश्वत्थाम
न्नृपुनः शीघ्रमस्त्रमेतत्त्वयोजय अवस्थिता हि पांचालाः पुनरेते जयैषिणः अश्वत्थामा तथोक्तस्तु तव पुत्रेण मारिष सुदीनमभिनिश्वस्य
राजानमिदमब्रवीत् नैतदावर्त्तते राजन्नस्त्रं हि द्विर्नोपपद्यते आवर्त्तितं हि निहंत्येनं प्रयोक्तारं न संशयः एषचास्त्रप्रतीघातं वासुदेवः प्रयुक्तवान् अन्य
थाविहितः संख्ये वधः शत्रोस्तु तेनाधिपः पराजयो वा मृत्युर्वा श्रेयान्मृत्युर्न निर्जयः विजिताश्चारयो ह्येते शस्त्रोत्सर्गान्मृतोपमाः दुर्योधन उवाच आचार्य
पुत्रपक्षेन हि त्वं नवयुज्यते अमी गुरुघ्नाववध्यं जामहे त्वं विदांवर त्वयि शस्त्राणि दिव्यानि त्र्यंबके चापि मे तो जसि इच्छतो न हि ते मुच्येत्क्रुद्धो हि पु
रंदरः धृतराष्ट्र उवाच तस्मिन्नस्त्रे प्रतिहते द्रोणे चोपधिना हते तथा दुर्योधनेनोक्ते द्रौणिः किमकरोत्पुनः दृष्ट्वा पार्थोस्त्रसंग्रामे युद्धा
यसमुपस्थितान् नारायणास्त्रनिर्मुक्तश्चरंतः पृतनामुखे संजय उवाच जानन्पितुः स निधनं सिंहलांगूलकेतनः सक्रोधो
भयमुत्सृज्य सोभिदुद्राव पार्षतं अभिद्रुत्य च विंशत्या क्षुद्रकाणां नरर्षभ पंचभिश्चातिवेगेन विव्याध पुरुषर्षभः धृष्टद्युम्नस्ततो रा
जन्ज्वलंतमिव पावकं द्रोणपुत्रं त्रिषष्ट्या तु राजन्विव्याध पत्रिणां सारथिं चास्य विंशत्या स्वर्णपुंखैः शिलाशितैः हयांश्च चतुरो विध्वा च तु
र्भिर्निशितैः शरैः विध्वा विध्वा नदद्द्रौणिः कंपयन्निव मेदिनीं आददे सर्वलोकस्य प्राणानिव महारणे पार्षतस्तु बली राजन्कृतास्त्रः कृत ८३
निश्चयः द्रौणिमेवाभिदुद्राव मृत्युं कृत्वा निवर्त्तनं ततो बाणमयं वर्षं द्रोणपुत्रस्य मूर्द्धनि अवासृजदमेयात्मा पांचालो रथिनां वरः तं
द्रौणिः समरे क्रुद्धं छादयामास पत्रिभिः विव्याध चैनं दशभिः पितुर्वधमनुस्मरन् द्वाभ्यां च सुविसृष्टाभ्यां क्षुराभ्यां ध्वजकार्मुके छि

द्रो०
२५०

लापांचालराजस्यद्रोणस्तैःशरैःसमार्दयत् अश्वसूतरथंचैवतद्द्रोणस्यकेमहाहवे तस्यचानुचरान्सर्वान्क्रुद्धःपाञ्चाल्यपुत्रयोः ततःप्रदुद्रुवेसर्वेषां
बालानांविशांपते संध्यांतस्मात्तेचनशस्मरमेश्रुत दृष्ट्वानुविमुखान्योधान्धृष्टद्युम्नंचपीडितं शैनेयोचोदयत्तूर्णंरथंद्रोणरथं
प्रति ऋषिभिर्निशितैर्वीरोरक्षमाणानमार्दयत् विंशत्यातुनराहत्वानानारूपैःसमर्पणाः विद्याधचनतयासूनंचतुर्भिस्तुरगोहयान् धनु
ध्वजंचसंयत्तेस्विच्छेदकृतहस्तवत् सप्तासंयधमवापिरथेहेमपीस्कृतंहृदि विद्याधसमरेत्रिंशतासायकैर्भृशं एवंसपीडितोराजन्नश्वत्था
मामहाबलः शरजालैःपरिवृतः कर्तव्यंनाभ्यपद्यतएवंगतेगुरोःपुत्रेतवपुत्रोमहारथः कृपकर्णादिभिःसार्द्धंशरैःसात्वतमावृणोत् दु
र्योधनस्तुविंशत्याकृपःशारद्वतस्त्रिभिः कृतवर्मायदशभिःकर्णःपंचशताशरैः दुःशासनःशतेनैववृषसेनश्चसप्तभिः सात्यकिंविव्यधुस्त
र्णंसमंतान्निशितैःशरैः ततःससात्यकीराजन्सर्वानेवमहारथान् विरथान्विमुखांश्चक्षणेनैवाकरोन्नृप अश्वत्थामानुसंप्राप्यचेतना
मात्तेपमैविततपमासदुः त्वानौनिःश्वसंश्चपुनःपुनः ततोरथांतरंद्रोणिःसमारुह्यपरंतपः सात्यकिंवारयामासकिरन्शतान्बहूनतमा
पतंतंसंख्येसमाद्राजसुतंरणे विरथंविमुखंचैवपुनश्चक्रेमहारथः ततस्तेपाण्डवाराजन्दृष्ट्वासात्यकिविक्रमं शंखशब्दान्भृशंचक्रुःसिं
हनादांश्चनेदिरे एवंतंविरथंकृत्वासात्यकिःसत्यविक्रमः जघानवृषसेनस्यत्रिसाहस्रान्महारथान् अयुतंदंतिनांसार्द्धंकृपस्यनिजघानसः
पंचापुत्रानितांस्थानांशकुनेर्निजघानसः ततोद्रोणिर्महाराजरथमारुह्यवीर्यवान् सात्यकिंप्रतिसंक्रुद्धःप्रययौतद्वधेप्सया पुनस्तमागतंदृ
ष्ट्वाशैनेयोनिशितैःशरैः चदारयत्क्रान्तैश्चपुनःपुनर्विदृप सोतिविद्धोमहेष्वासोनानालिंगैरमर्षणः युयुधानेनवैद्रोणिः प्रहसन्वाक्य
मब्रवीत् शैनेयाभ्युपपत्तिंतेजानाम्याचार्यघातिनि नचैनंत्रास्यसिमयाग्रस्तमात्मानमेषच शपेनवाहंशैनेयसत्येनतपसा

राम०
२५०

तथा च हत्वा सर्वपांचालान्त्रिंहिशांतिमहं लभे यह्लं पांडवेयानां हस्तीनामपि यद्बलं किंयतां सर्वमेवेह निहनिष्यामि सोमकान् एवमु
क्त्वा क्रोश्यमानं सुतो भूयो नेशरोत्तमं अहृजहास कौंतेयो गांडीवं चेंद्रचेपथा हरिः सनंतिमिषितेनास्तः सायकः सशरावरं विवेश वसु
धां भित्वा म्हलबिलमिवोरगः सभिन्नकवचः श्रांतो त्राहितश्चविह्वलः विमुच्य सशरं चापं भूरिश्रवणपरिस्रवः सोद धिसिक्तस्याथोपस्थउ
पाविशत् स तेनापहृतं तस्तूर्णं द्रोणपुत्रादथांतरं अथानेन सुपुंखेन शरेणानतपर्वणा आजघान भुवो मध्ये धृष्टद्युम्नं परंतपः सप
वेमतिविद्धस्वमर्शं पश्चात्प्रपीडितः ससादाथ च यांचालो अपाश्रयत च ध्वजं तं नागमिव सिंहेन हत्वा राजन् शरार्दितं जवेनाभ्यद्रवं शूराः
पंच पांडवतो रथाः किरीटी भीमसेनश्च वृद्धक्षत्रश्च पौरवः युवराजश्च चेदीनां मालवश्च सुदर्शनः एते हाहाकृताः सर्वे प्रगृहीतशरासनाः वी
रं द्रोणायनिं वीराः सर्वतः पर्यवारयन् ते विंशतिपदे यत्ता गुरुपुत्रममर्षणं पंचभिः पंचभिर्वीराः पौरवं द्रोणिरार्द्यत मालवं त्रिभिरेकेन पा
र्थं षड्भिर्वृकोदरं ततस्ते विव्यधुः सर्वे द्रोणिं राजन् महारथाः युगपच्च पृथक्चैव रुक्मपुंखैः शिलाशितैः युवराजश्च विंशत्या द्रोणिं विव्याध प
त्रिभिः पार्थश्च पुनराष्टाभिस्तथा सर्वे त्रिभिस्त्रिभिः ततोर्जुनं षड्भिरथाजघान द्रौणायनिर्दशभिर्वासुदेवं भीमं दशार्धैर्युवराजं चतुर्भिर्द्वा
भ्यां द्वाभ्यां मालवं पौरवं च सूतं विद्ध्वा भीमसेनस्य षड्भिर्द्वाभ्यां छित्वा कार्मुकं च ध्वजं च पुनः पार्थं शरवर्षेण विद्ध्वा द्रौणिर्घोरं सिंहनादं ननाद
तस्यास्तनलाग्निशितान्पीतधारान् द्रौणेः शरान् पृष्ठतश्चाग्रतश्च धरा वियत्द्यौः प्रदिशो दिशश्च छन्ना बाणैरभवन् घोररूपैः आसन्नस्य
रथं तीव्रतेजाः सुदर्शनस्येंद्रकेतुप्रकाशौ भुजौ शिरश्चेंद्रसमानवीर्यस्त्रिभिः शरैर्युगपत्संचकर्त स पौरवं रथशक्त्या निहत्य छित्वा रथं तिलश
श्चासिबाणैः छित्वा च बाहू वरचंदनाक्तौ भल्लेन कायाच्छिरश्चकर्त युवानमिंदीवरदामवर्णं चेदिप्रभुं युवराजं प्रसह्य बाणैस्त्वरावान्प्रज्व

द्रो० लिताग्निकल्पैर्विध्वाशरान्मुखेशन्मधूतं मालवंपौरवंचैवपुत्रराजंचवेदिपं दृष्ट्वासमक्षंनिहतंद्रोणपुत्रेणपांडवः भीमसेनोमहाबाहुः क्रो
२४१ धमाहारयत्परं ततःशरशतैस्तीक्ष्णैः संक्रुद्धाशीविषोपमैः छादयामाससमरेद्रोणपुत्रंपरंतपः ततोद्रौणिर्महातेजाः शरवर्षंनिहत्यतं
विव्याधनिशितैर्बाणैर्भीमसेनममर्षणः ततोभीमोमहाबाहुर्द्रौणेर्युधिमहाबलः क्षुरप्रेणधनुश्छित्वाद्रौणिंविव्याधपत्रिणा तदपा
स्यधनुश्छिन्नंद्रोणपुत्रोमहामनाः अन्यत्कार्मुकमादायभीमंविव्याधपत्रिभिः तौद्रोणिभीमौसमरेपराक्रांतौमहाबलौ अवर्षतांश
रवर्षंवृष्टिमंताविवांबुदौ भीमनामांकिताबाणाः स्वर्णपुंखाःशिलाशिताः द्रौणिंसंछादयामासुर्घनौघाइवभास्करं तथैवद्रौणिनि
र्मुक्तैर्भीमःसन्नतपर्वभिः अवाकीर्यतसमरेशरैःशतसहस्रशः सछाद्यमानःसमरेद्रौणिनारणशालिना नविव्यथेमहाराजतदद्भुत
मिवाभवत् ततोभीमोमहाबाहुःकार्तस्वरविभूषितान् नाराचान्दशसंप्रैषीद्यमदंडनिभान्शितान् तेजत्रुदेशमासाद्यद्रोणपुत्रस्यमा
रिष निर्भिद्यविविशुस्तूर्णंवल्मीकमिवपन्नगाः सोतिविद्धोभृशंद्रौणिःपांडवेनमहात्मना ध्वजयष्टिंसमाश्रित्य न्यमीलयतलोचने स
मुहूर्तात्पुनःसंज्ञांलब्ध्वाद्रौणिर्नराधिप क्रोधंपरममातस्थौसमरेरुधिरोक्षितः दृढंसोभिहतस्तेनपांडवेनमहात्मना वेगंचक्रेमहाबाहुर्भी
मसेनरथंप्रति ततआकर्णपूर्णानांशराणांतिग्मतेजसां शतमाशीविषाभाणांप्रेषयामासभारत भीमोपिसमरश्लाघीतस्यवीर्यमचिंतयत्
तूर्णंप्रासृजद्घोराणिशरवर्षाणिपांडवः ततोद्रौणिर्महाराजछित्वास्यविशिखैर्धनुः आजघानोरसिक्रुद्धःपांडवंनिशितैःशरैः ततोन्यद्ध
नुरादायभीमसेनोत्यमर्षणः विव्याधनिशितैर्बाणैर्द्रौणिंपंचभिराहवे जीमूताविवघर्मांतेतौशरौघप्रवर्षिणौ अन्योन्यंक्रोधताम्राक्षौछा एम०
दयामासतुर्युधि तलशब्दैस्ततोघोरैस्त्रासयंतौपरस्परं अयुध्येतांसुसंरब्धौकृतप्रतिकृतैषिणौ ततोविस्फार्यसुमहच्चापंरुक्मविभूषितं २४१

भीमं प्रेक्षन्तमसौ द्रोणः शरानंसंतमतिक्रमात् शरघृष्टम्भ्रमगतो दीप्तो गिरिरिवभास्करः आददानस्य विशिखान्संदधानस्य चाशुगान् विकर्ष
तो मुंचतश्चान्तरं ददृशुर्जनाः अलातचक्रप्रतिमं तस्य मंडलमायुधं द्रोणस्यासीन्महाराज बाणान्क्षिपतस्तदा धनुश्च्युताः शरास्तस्य शतशोथ
सहस्रशः आकाशे प्रत्यदृश्यन्त शलभानामिवायतीः तं तु द्रोणविनिर्मुक्ताः शरा हेमविभूषिताः अजस्रमन्वकीर्यन्त घोरा भीमरथं प्रति
तत्राद्भुतमपश्याम भीमसेनस्य विक्रमं बलवीर्यप्रभावं च व्यवसायं च भारत तां समेघादिवोद्भूतां बाणवृष्टिं समंततः जलवृष्टिं महाघोरां
तथा तं प्रतिपद्यन्त द्रोणपुत्रवधेप्सुभीमाभीमपराक्रमः अमुंचत्पुरवर्षाणि प्रावृषीव बलाहकाः ततः कार्ष्णं भीमस्य धनुर्घोरं महा
रौप्यविकृष्यमाणं विबभौ शक्रचापमिवापरं तस्माच्छराः प्रादुरासन्शतशोथ सहस्रशः संछादयन्तः समरे द्रोणमाहवशोभिनं
तथा विसृजतो रुक्मशरजालानि मारिष वायुरप्यन्तरं गन्तुं नाशक्नोदतिसर्पितुं तथा द्रोणो महाराज शरान्हेमविभूषितान् तैलधौतान्
प्रसन्नाग्रान्प्राहिणोद्वधकांक्षया तानंतरिक्षे विविधैर्विविधैः केकमशातयत् विशेषयन्द्रोणसुतः तिष्ठ तिष्ठेति चाब्रवीत् पुनश्च शरवर्षा
णि द्रोणाय प्राहिणोत्पांडवः अथ जज्वलबाणं क्रुद्धो द्रोणपुत्रवधेप्सया ततो द्रोणमापयात् शरवृष्टिं निवार्य तां धनुश्चिच्छेद भीमस्य द्रोणपु
त्रो महाहववित् शरैश्चैनं सुबहुभिः क्रुद्धः संख्ये पराभिनत् स च्छिन्नधन्वा बलवान् रथशक्तिं सुदारुणां वेगेनाविध्य चिक्षेप द्रोणपुत्ररथं प्र
ति तामापतन्तीं सहसा महोल्काभां शितैः शरैः चिच्छेद समरे द्रोणिर्दर्शयन्पाणिलाघवं एतस्मिन्नंतरे भीमो दृढमादाय कार्मुकं द्रोणिं
विव्याध विशिखैः स्मयमानो वृकोदरः ततो द्रोणिर्महाराज भीमसेनस्य सारथिं ललाटे दारयामास शरेणानतपर्वणा सोतिविद्धो ब

द्रो० लवता द्रोणपुत्रेण मारिष: व्यामोहमगमद्राजन्रश्मीनुत्सृज्य वाजिनां ततोऽश्वाः प्राद्रवंस्तूर्णं मोहिते रथसारथौ भीमसेनस्य राजेंद्र पश्यतां स
२५२ र्वधन्विनां ते दृष्ट्वा प्रद्रुतानश्वान्विह्वलस्य कशरणाजिरात् दध्मौ च मुदितः शंखं बृहंतमपराजितः ततः सर्वे च पांचाला भीमसेनश्च पांडवः धृष्टद्युम्न
रथं त्यक्त्वा भीताः संप्राद्रवन्दिशः तान्प्रभग्नांस्ततो द्रौणिः पृष्ठतो विकिरन्छरान् अभ्यवर्त्तत वेगेन कालयन्पांडुवाहिनीं ते वध्यमानाः
समरे द्रोणपुत्रेण पार्थिवाः द्रोणपुत्रं भयाद्राजन्दिक्षु सर्वासु भेजिरे इति महाभारते द्रोणपर्व्वणि संजय उवाच तत्प्रभग्नं बलं दृष्ट्वा कुंती
पुत्रो धनंजयः न्यवारयदमेयात्मा द्रोणपुत्रजयेप्सया ततस्ते सैनिका राजन्नैव तत्रावतस्थिरे संस्थाप्यमाना यत्नेन गोविंदेनार्जुनेन च
एक एव तु बीभत्सुः सोमकावयवैः सह मत्स्यैरन्यैश्च संधाय कौरवैः सन्न्यवर्त्तत ततोऽर्जुनमतिक्रम्य सिंहलांगूलकेतनं सव्यसाचीमहे
ष्वासमश्वत्थामानमब्रवीत् या शक्तिर्यच्च विज्ञानं यद्वीर्यं यच्च पौरुषं धार्त्तराष्ट्रेषु या प्रीतिर्द्वेषोऽस्मासु च यश्च ते यच्च भूयोऽस्ति तेजस्त
त्सर्वं मयि दर्शय स एव द्रोणहंता ते दर्पं छेत्स्यति पार्षतः कालानलसमप्रख्यं द्विषतामंतकं युधि समासादय पांचाल्यं मां चापि सहके
शवं दर्पं नाशयितास्म्यद्य तवोद्धतस्य संयुगे धृतराष्ट्र उवाच आचार्यपुत्रो मानार्हो बलवांश्चापि संजय प्रीतिर्धनंजये चास्य प्रियश्चा
पि महात्मनः न भूतपूर्वं बीभत्सोर्वाक्यं परुषमीदृशं अथ कस्मात्स कौंतेयः सखायं रूक्षमुक्तवान् संजय उवाच युवराजे हते चैव वृद्धक्ष
त्रे च पौरवे इष्वस्त्रविधिसंपन्ने मालवे च सुदर्शने धृष्टद्युम्ने सात्यकौ च भीमे चापि पराजिते युधिष्ठिरस्य तैर्वाक्यैर्मर्मण्यपि च घट्टिते अंतर्भे राम०
दे च संजाते दुःखं संस्मृत्य च प्रभो अभूतपूर्वो बीभत्सोर्दुःखान्मन्युरजायत तस्मादनर्हमश्लीलमप्रियं द्रौणिमुक्तवान् मान्यमाचा २५२

येननयंहस्संकापुरुषेणयथा एवमुक्तः सतुक्रोधान्महेष्वासस्तमानघ पार्थेनपरुषंवाक्यंसर्वमर्माभिदागिरा द्रौणिस्तुकोपपार्थायकृत्स्नायचवि
शेषतः सतुयत्तोरणेस्थित्वावार्युपस्पृश्यवीर्यवान् देवैरपिसुदुर्धर्षमस्त्रमाग्नेयमाददे दृश्यादृश्यानरिगणानुद्दिश्याचार्यनंदनः सोभिमंत्र
शरंदीप्तंविधूममिवपावकं सर्वतः क्रोधमाविश्यचिक्षेपपरवीरहा ततस्तुमुलमाकाशेशरवर्षमजायत पावकार्चिःपरीतंतत्पार्थमेवाभि
पुप्लुवे उल्काश्चगगनात्पेतुर्दिशश्चनचकाशिरे तमश्चसहसारौद्रंचमूमवततारतां रक्षांसिचपिशाचाश्चविनेदुरभिसंगताः ववुश्चाप्यशि
वावाताः सूर्योनैवततापच वायसाश्चापिचाक्रंदन्दिक्षुसर्वासुभैरवं रुधिरंचापिवर्षंतोविनेदुस्तोयदांबरे पक्षिणः पशवोगावोमुनयश्चा
पिसुव्रताः परमंप्रयतात्मानोनशांतिमुपलेभिरे भ्रांतसर्वमहाभूतंह्यावर्तितदिवाकरं त्रैलोक्यमभिसंतप्तंज्वराविष्टमिवाभवत् श्च
स्त्रतेजोभिसंतप्तानागाभूमिशयास्तथा निःश्वसंतः समुत्पेतुस्तेजोघोरंमुमुक्षवः जलस्थानिचसत्त्वानिदह्यमानानिभारत नशां
तिमुपजग्मुर्हितप्यमानैर्जलाशयैः दिशःप्रदिशः खंभूमिः सर्वतः शरवृष्टयः उच्चावचानिपेतुर्वैगरुडानिलरंहसः तैः शरैर्द्रोणपुत्र
स्यवज्रवेगैः समाहताः प्रदग्धाः शत्रवः पेतुरग्निदग्धाइवद्रुमाः दह्यमानामहानागाः पेतुरुर्व्यांसमंततः नदंतोभैरवान्नादान्जलदोपम
निस्वनान् अपरेप्रद्रुतानागाभयत्रस्ताविशांपते भेजुर्दिशोयथापूर्वंवनेदावाग्निसंवृताः द्रुमाणांशिखराणीवदावदग्धानिमारिष
अश्ववृंदान्यदृश्यंतरथवृंदानिभारत अपतंतरथौघाश्चतत्रतत्रसहस्रशः तत्सैन्यंभयसंविग्नंददाहयुधिभारत युगांतेसर्वभूतानिसंवर्त
कइवानलः दृष्ट्वातुपांडवींसेनांदह्यमानांमहाहवे प्रहृष्टास्तावकाराजन्सिंहनादान्विनेदिरे ततस्तूर्यसहस्राणिनानालिंगानिभारत

द्रो० तूर्णमाजौ घोरे दृष्ट्वास्त्रावकाजितकाशिनः कृष्णावदृष्टौ हि तौ राजन्नश्वत्थामा च पांडवः तमसा संवृते लोके नादृश्यत महाहवे नैव तत्रादृश्यं
२५३ राजन् दृष्टपूर्वं न च श्रुतं यादृशं द्रोणपुत्रेण सृष्टमस्त्रममर्षिणा अर्जुनस्तु महाराज ब्राह्ममस्त्रमुदैरयत् सर्वास्त्रप्रतिघातार्थं विहितं
पद्मयोनिना ततो मुहूर्त्तादिव तत्तमो व्युपशशाम ह प्रववौ चानिलः शीतो दिशश्च विमला बभुः तत्राद्भुतमपश्याम कृत्स्नामक्षौ
हिणीं हतां अनभिज्ञेयरूपां च प्रदग्धामस्त्रतेजसा ततो वीरौ महेष्वासौ विमुक्तौ केशवार्जुनौ सहितौ प्रत्यदृश्येतां तमसीव तमो
नुदौ ततो गांडीवधन्वा च केशवश्चाक्षतावुभौ सपताकध्वजहयः सानुकर्षवरायुधः प्रबभौ स रथो युक्तस्तावकानां भयंकरः ततः
किलकिलाशब्दः शंखभेरीस्वनैः सह पांडवानां प्रहृष्टानां क्षणेन समजायत हताविति हि तत्रासीत्तेन योः स्म भयो मतिः तमसा संवृतौ
दृष्ट्वा सहितौ केशवार्जुनौ तावक्षतौ प्रमुदितौ दध्मतुर्वारिजोत्तमौ दृष्ट्वा प्रमुदितैः पार्थांस्त्वदीया व्यथिताभवन् विमुक्तौ च महात्मानौ
दृष्ट्वा द्रोणिः सुदुःखितः मुहूर्त्तं चिंतयामास किं त्वेतदिति मारिष चिंतयित्वा च राजेंद्र ध्यानशोकपरायणः निःश्वसन्दीर्घमुष्णं च दुःखा
तैस्त्वामभवत्तदा ततो द्रोणिर्धनुस्त्यक्त्वा रथात्प्रस्कंद्य वेगितः धिक् धिक् सर्वमिदं मिथ्येत्युक्त्वा संप्राद्रवद्रणात् ततः स्निग्धांबुदाभासं
वेदव्यासमकल्मषं आसन्नं ददर्श पुरतः साक्षाद्धर्ममिवावस्थितं तं द्रोणिरग्रतो दृष्ट्वा स्थितं कुरुकुलोद्वह सन्नकंठोब्रवीद्वाक्यमभिवाद्य
सुदीनवत् नो भो मायायदृच्छया वा न विद्मः किमिदं भवेत् अस्त्रं त्विदं कथं मिथ्या मम कश्च व्यतिक्रमः अधरोत्तरमेतद्वा लोकानां वा राम०
पराभवः यदिमौ जीवतः कृष्णौ कालो हि दुरतिक्रमः नासुरा न च गंधर्वा न पिशाचा न राक्षसाः न सर्पयक्षपतगा न मनुष्याः कथंच २५३

न त्वत्सदृशेन मया कर्तुं मे न दक्षं मयेरितं तदिदं केवलं हत्वा शांतमस्यै हि रणोज्ज्वलत् सर्वेषामिमयापृक्कमहं त्वं परमदारुणं केनैमौ मत्तौ धर्मी रणौ नावधी

त्केशवार्जुनौ एतन्मे ब्रूहि भगवान्मयापृष्टो यथातथं श्रोतुमिच्छामि तत्त्वेन सर्वमेतन्महामुने व्यास उवाच महांतमेवमर्थं मां त्वं पृच्छसि

विस्मयात् तं शृणुष्वाभिनिश्चयं समाधाय मनः शृणु यो सौ नारायणो नाम सर्वेषामपि पूर्वजः अजायत च कार्यार्थे पुत्रो धर्मस्य विश्वकृत्

स तपस्तीव्रमानस्थो मैनाकं गिरिमास्थितः ऊर्ध्वबाहुर्महातेजा ज्वलनादित्यसंनिभः षष्टिं वर्षसहस्राणि तावंत्येव शतानि च अशोषय

त्तदात्मानं वायुभक्षोंबुजेक्षणः अथापरं तपस्तप्त्वा द्विस्ततो ऽन्यत् पुनर्महत् द्यावापृथिव्योर्विवरं तेजसा समपूरयत् स तेन तपसा तात ब्रह्मभूतो य

दाभवत् ततो विश्वेश्वरं योनिं विश्वस्य जगतः १५ ददर्श भृशदुर्दर्शं सर्वैर्देवैरपि प्रभुं अणीयसामणीयांसं बृहद्भ्यश्च बृहत्तमं रुद्रमीशानमृषभं हरं शं

भुं कपर्दिनं चेकितानं परं योनिं तिष्ठतो गच्छतश्चैव दुर्वारणं दुर्दर्षं तिग्ममन्युं महात्मानं सर्वहरं प्रचेतसं दिव्यं चापमिषुधी चाददानं हिरण्य

कवचोद्यमनंतवीर्यं पिनाकिनं वज्रिणं दीप्तशूलं परश्वधिनं गदिनं चापतासिं सुभ्रुं जटिलं मुशलिनं चंद्रमौलिं व्याघ्राजिनं परिघिणं दंड

पाणिं शुभांगदिनं नागयज्ञोपवीतिनं विशिखैर्गणैः शोभितं भूतसंघैः एकीभूतं तपसां संनिधानं वयोति गैः सुष्टुतमिष्टवाग्भिः

जलं दिशं खं क्षितिं चंद्रसूर्यौ तथा वाय्वग्नी प्रतिमानं जगच्च नालं द्रष्टुं यं पृथग्भिन्नवृत्तो ब्रह्मद्विषघ्नममृतस्य योनिं यं पश्यंति ब्राह्मणाः

साधुवृत्ताः क्षीणपापा मनसा वीतशोकाः तं निष्ठपं तं तपसा धर्ममीड्यं तद्भक्तो वै विश्वरूपं ददर्श दृष्ट्वा चैनं वाङ्मनोबुद्धिदेहैः संहृष्टात्मा

नृ॰ सुतुर्देवासुदेवः अक्षमालापरीक्षिप्तंजोतिषांपरमंनिधिं नतोनारायणोहृष्टावचंदेविस्मृसंभवं वरदंपृथुचार्वंगपाणावेतामहितंप्रभुं कोड
२५५ मानंमहात्मानंभूतसंघगणैर्वृतं अजमीशानमव्यक्तंकारणात्मानमच्युतं अभिवाद्यथरुद्रायसद्योधकनिपातिने पद्माक्षस्तंविरूपाक्ष
मभितुष्टावभक्तिमान् नारायणउवाच त्वमेभूताभूतकृन्नाथेवरेण्यगोप्तारोघभुवनस्यर्वदेवाः आविश्यमांधरणीयेप्ररक्षनंपुराणी पुरा॰
तवदेवसृष्टीं सुरासुरान्नागरक्षःपिशाचान्नरान्सुपर्णान्गंधर्वयक्षान् पृथग्विधान्भूतसंघांश्चविश्वांस्तत्तंभूतान्विश्वसृजोस्तथैव
ऐंद्रंयाम्यंवारुणंवैत्रपालंपैत्रंत्वाष्टुंकर्मसौम्यंचतुभ्यं रूपंज्योतिःशब्दश्चाकाशवायुःस्पर्शःस्वाद्यंसलिलंगंधऊर्वी कालोब्रह्माब्रह्मच
ब्राह्मणाश्चत्वत्तंभूतंस्थास्नुचरिष्णुचेदं अग्नौलोकायांतियथापृथक्कताभिस्त्वैकांसंक्षयेयांतिभूयः एवंविद्वान्प्रभवंचाप्ययंचमत्वाभू
तानांतवसायुज्यमेति दिव्याव्रुत्तौमानसौद्वौसुपर्णौवक्रशाखाःपिप्पलाःसप्तगोप्ताः दशाप्यन्येयेपुरंधारयंतित्वयासृष्टास्त्वंहितेभ्यः
परोहि भूतंभव्यंभवितावाप्यधृष्यंत्वत्तंभूतामवनाणीहविश्वा भक्तंचमांभजमानंभजस्वमारीरिषोमामपित्वहितैस्त्व आत्मा
नंत्वामात्मनानावबोधंविद्वानेवंगतिमब्रह्मशुक्रं अस्तौषंत्वांतवसंमानमिच्छन्विचिंत्यवंयंसुरदेववर्य सुदुर्लभान्देवेहिरान्ममेष्टान राम॰
भिष्टुतःप्रविकार्षीश्चमायामाप्तस्तवाच तस्मैवरानचिंत्यात्मानीलकंठःपिनाकधृक् अर्हतेदेवमुख्यायप्रायच्छद्धृषितस्तुतः भ २५५

गवानुवाच मत्ससाराम्मनुष्येषुदेवगंधर्वयोनिषु अश्वमेधबलात्मातंनाएएपराभविष्यसि नचत्वांशक्ष्यहिंस्यंतिदेवासुरमहोरगाः नपिशा
चानगंधर्वानपक्षानचराक्षसाः नसुपर्णास्तथानागानचतिर्यग्विवियोनिजाः नकश्चित्त्वांचदेवोपिसमरेषुविजेष्यति नशस्त्रेणनवज्रे
णानाग्निनानचवायुना नचार्द्रेणनसुष्केणत्रसेनस्थावरेणच कश्चिन्नवरुजंकर्त्तामस्मत्प्रसादात्कथंचन अपिचैत्समरंगत्वाभविष्य
सिममाधिकः एवमेतानवरान्लब्धापुरत्नाहिद्विरुशोणिता सएषदेवस्त्वरतिमायपामोहयनजगत तस्यैवतपसाज्ञातेनरनामम
ह्यामुनिं तुल्यमेतेनदेवेनतंजानीह्यच्युतंसदा तावेतौश्वदेवानांपरमौपाविताहृषी लोकयात्राविधानार्थंसंज्ञायेतेयुगेयुगे
तथैवकर्मणः कृत्स्नंमहतस्तपसोपिच तेजोमनुष्यविग्रस्त्वंजानीरौद्रंमहामते सभवान्देहवान्त्र्यातोज्ञात्वाभवमयंज
गत्र अराकर्षतवात्मानंनियतेस्त्वियेसया शुभसत्वभवानकृत्वामहापुरुषविग्रहं ईजिवांस्त्वंजपैर्होमैरुपहारैश्चमानद स
तथाप्रमानस्तेपूर्वदेहवतनुषत पुष्कलांस्त्ववरान्सर्वान्नवविद्वन्हृदिस्थितान् जन्मकर्मतपोयोगास्तयोस्तववचपुष्कलाः
ताभ्यांलिंगार्चितोदेवस्त्वयाराधितोयुगेयुगे सएषरुद्रभक्तश्चकेशवोरुद्रसंभवः सर्वरूपभवंज्ञात्वालिंगेयोर्च्चयतिप्रभुं आत्मयो
गास्तत्स्मिन्शास्त्रयोगाश्चशाश्वताः एतंदेवाश्चयजंतोहिसिद्धाश्चपरमर्षयः प्रार्थयंतेपरंलोकेस्थानमेकंसमर्थकृत् कृष्णएवहि

द्रो० २५५ पतृष्यापरैश्चैवसनातनः सर्वभूतभवंज्ञात्वालिंगमर्चेतियःप्रभुं तस्मिन्नभ्यधिकांप्रीतिंकरोतिवृषभध्वजः संजयउवाच तस्यतद्वचनंश्रुत्वा
द्रोणपुत्रोमहारथः नमश्चकाररुद्रायबहुमेनेचकेशवं हृष्टरोमाचवश्यात्मात्वाभिवाद्यमहर्षये वरूथिनीमभिप्रेक्ष्यअवहारमकार
यत् ततःप्रत्यवहारोभूत्पांडवानांविशांपते कौरवाणांचदीनानांद्रोणेयुधिनिपातिते युद्धंकृत्वादिनान्पंचद्रोणोहत्वावरूथिनीं
ब्रह्मलोकंगतोराजन्ब्राह्मणोवेदपारगः महाभारतेद्रोणपर्वणि धृतराष्ट्रउवाच तस्मिन्नतिरथेद्रोणेनिहतेपार्षतेनवै
मामकाःपांडवाश्चैवकिमकुर्वन्नतःपरं संजयउवाच तस्मिन्नतिरथेद्रोणेनिहतेपार्षतेनवै कौरवेषुचभग्नेषुकुंतीपुत्रोधनंजयः
दृष्ट्वासुमहदाश्चर्यमात्मनोविजयावहं यदृच्छयागतंव्यासंपप्रच्छभरतर्षभः अर्जुनउवाच संग्रामेन्यहनंछत्रून्शरौघैर्विमलै
रहं अग्रतोलक्षयेयांतंपुरुषंपावकप्रभं ज्वलंतंशूलमुद्यम्यायांदिशंप्रतिपद्यते तस्यांदिशिविदीर्यंतेशत्रवोमेमहामुने तेनभग्ना
नरीन्सर्वान्मद्गतान्मन्वतेजनः तेनभग्नानिसैन्यानिपृष्ठतोनुदहाम्यहं भगवंस्तन्ममाचक्ष्वकोवैसपुरुषोत्तमः शूलपाणिर्महा
कृत्स्नस्तेजसासूर्यसंनिभः नपद्भ्यांस्पृशतेभूमिंनचशूलंविमुंचति शूलाच्छूलसहस्राणिनिष्पेतुस्तस्यतेजसा व्यासउवाच प्र
जापतीनांप्रथमंतैजसंप्रथमंप्रभुं भुवनंभूर्भुवंदेवंसर्वलोकेश्वरंप्रभुं ईशानंवरदंपार्थदृष्टवानसिशंकरं तंगच्छशरणंदेवंवरदंभु राम०
वनेश्वरं महादेवंमहात्मानमीशानंजटिलंशिवं त्र्यक्षंमहाभुजंरुद्रंशिखिनंचीरवाससं महादेवंहरंस्थाणुंवरदंभुवनेश्वरं जग २५५
त्प्रधानमजितंजगत्प्रीतिमधीश्वरं जगद्योनिंजगद्वीजं

जपिनंजगतोगतिं विश्वात्मानंविश्वसृजंविश्वमूर्त्तिंयशस्विनं विश्वेश्वरंविश्वनरंकर्मणामीश्वरंप्रभुं शंभुंस्वयंभुंभूतेशंभूतभव्यभवोद्भवंयो
गंयोगेश्वरंसर्वंसर्वलोकेश्वरेश्वरं सर्वश्रेष्ठंजगछ्रेष्ठंवरिष्ठंपरमेष्ठिनं लोकत्रयविधातारमेकंलोकत्रयाश्रयंसुदुर्ज्जयंजगन्नाथंजन्म
मृत्युजरातिगं ज्ञानात्मानंज्ञानगम्यंज्ञानश्रेष्ठंसुदुर्विदं दातारंचैवभक्तानांप्रसादविहितान्वरान् तस्यपारिषदादिव्यारूपैर्नानाविधैर्वि
भोः वामनाजटिलामुंडाह्रस्वग्रीवामहोदराः महाकायामहोत्साहामहाकर्णास्तथापरे आननैर्विकृतैः पादैःपार्थवेषैश्चवैकृतैः
ईदृशैः समहादेवः पूज्यमानोमहेश्वरः सशिवस्ताततेजस्वीप्रसादाद्यातितेग्रतः तस्मिन्घोरेसदापार्थसंग्रामेलोमहर्षणे द्रोणिक
र्णकृपैर्गुप्तांमहेष्वासैःप्रहारिभिः कस्तांसेनांतदापार्थमनसापिप्रधर्षयेत् ऋतेदेवान्महेष्वासाद्बहुरूपान्महेश्वरात् स्थातुमुत्सह
तेकश्चिन्नतस्मिन्नग्रतः स्थिते नहिभूतंसमंतेनत्रिषुलोकेषुविद्यते गंधेनापिहिसंग्रामेतस्यक्रुद्धस्यशत्रवः विसंज्ञाहतभूयिष्ठा
वेपंतिचपतंतिच तस्मैनमस्तुकुर्वंतोदेवास्तिष्ठंतिवैदिवि येचान्येमानवालोकेयेचस्वर्गजितोनराः येभक्तावरदंदेवंशिवंरुद्रमु
मापतिं इहलोकेसुखंप्राप्यतेयांतिपरमांगतिं नमस्कुरुष्वकौंतेयतस्मैशांतायवैसदा रुद्रायशितिकंठायकनिष्ठायसुवर्चसे क
पर्द्दिनेकरालायहर्यक्षवरदायच याम्यायाव्यक्तकेशायसद्वृत्तेशंकरायच काम्यायहरिनेत्रायस्थाणवेपुरुषायच हरिकेशा
यमुंडायकृशायोत्तारणायच भास्करायसुतीर्थायदेवदेवायरंहसे बहुरूपायसर्वायप्रियायप्रियवाससे उष्णीषिणेसुवक्त्रायस
हस्राक्षायमीढुषे गिरिशायप्रशांतायपतयेचीरवाससे कपर्द्दिनेकरालायउग्रायपतयेदिशां पर्जन्यपतयेचैवभूतानांपतयेनमः

द्रो० वृक्षाणांपतयेचैवगवांचपतयेनमः वृक्षैरावृतकायायसेनान्येमध्यमायच स्रुवहस्तायदेवायधन्विनेभार्गवायच बहुरूपायविश्व
२५६ रूपतयेमुंजवाससे सहस्रशिरसेचैवसहस्रनयनायच सहस्रबाहवेचैवसहस्रचरणायचशरणंगच्छकौंतेयवरदंभुवनेश्वरं उमा
पतिंविरूपाक्षंदक्षयज्ञनिबर्हणं प्रजानांपतिमव्यग्रंभूतानांपतिमव्ययं कपर्दिनंवृषावर्त्तंवृषनाभंवृषध्वजं वृषदर्पंवृषपतिंवृषशृं
गंवृषर्षभं वृषांकंवृषभोदारंवृषभंवृषभेक्षणं वृषायुधंवृषशरंवृषभूतंमहेश्वरं महोदरंमहाकायंद्वीपिचर्मनिवासिनं लोकेशंव
रदंमुंडंब्रह्मण्यंब्राह्मणप्रियं त्रिशूलपाणिंवरदंखड्गचर्मधरंप्रभुं पिनाकिनंखड्गधरंलोकानांपतिमीश्वरं प्रपद्येशरणंदेवंश
रण्यंचीरवाससं नमस्तस्मैसुरेशाययस्यवैश्रवणःसखा सुवाससेनमस्तुभ्यंसुव्रतायसुधन्विने धनुर्द्धरायदेवायप्रियधन्वाय
धन्विने धन्वंतरायधनुषेधन्वाचार्यायतेनमः उग्रायुधायदेवायनमः सुरवरायच नमोस्तुबहुरूपायनमोस्तुबहुधन्विने नमो
स्तुस्थाणवेनित्यंनमस्तस्मैसुधन्विने नमोस्तुस्थाणवेनित्यंनमस्तस्मैसुधन्विने नमोस्तुत्रिपुरघ्नायभगघ्नायचवैनमः वनस्पती
नांपतयेनराणांपतयेनमः मातृणांपतयेचैवगणानांपतयेनमः गवांचपतयेनित्यंयज्ञानांपतयेनमः अपांचपतयेनित्यं
देवानांपतयेनराणांपतयेनमः [illegible] पूष्णोदंतविनाशायत्र्यक्षायवरदाय राम०
च नीलकंठायपिंगायस्वर्णकेशायवैनमः कर्म्माणियानिदिव्यानिमहादेवस्यधीमतः तानितेकीर्त्तयिष्यामियथाप्रज्ञंयथा २५६
श्रुतं नसुरानासुरालोकेनगंधर्वानराक्षसाः सुखमेधंतिकुपितेतस्मिन्नपिगुहागताः दक्षस्ययजमानस्यविधिवत्संभृतंपुरा

विव्याध कुपितो यक्षं निर्भयः समरे तदा । धनुषा बाणमुत्सृज्य सघोषं विननाद च । तेन शब्देन कुपितः शंगिं लेभिरे ऽसुरास्तदा । विद्युन्माली सहसा येन कु-
पितेन च महेश्वरे । तेन उत्पातघोषेण सर्वे लोकाः समाकुलाः । बभूवुर्वेशगाः पार्थिवे पेतुश्च सुरासुराः । श्वापदश्च क्षुभिरे सर्वाश्च कंपे च वसुधा ।
पर्वताश्च व्यशीर्यंत दिशो नागाश्च मोहिताः । अंधेन तमसा लोका न प्रकाशंत संवृताः । जज्वलुश्च सहस्रैस्ता सर्वेषां ज्योतिषां प्रभाः । चुक्रुशु-
र्भयभीताश्च शांतिं चक्रुस्तथैव च । ऋषयः सर्वभूतानामात्मनश्च स्वस्त्यैषिणः । शृंगाणाममरद्रुवन्तशर्करैः प्रहसन्निव पुरेरजः शाम्भक्षयतोरश-
नान्वैव्यशातयत् । ततो निष्क्रम्य सुरैर्देवो विषमाननताः स्मतं पुनश्च संदधे दीप्तान् देवानां निशितान् शरान् सधूमान्सस्फुलिंगांश्च विद्युत्ता-
पदसंनिभान् । तैर्हत्वा तु सुराः सैवगणास्त महेश्वरं रुद्रस्य यत्न भागं च विशिष्टं ते च कल्पयन् भयेन त्रिदशा राजन् शरणं च प्रपेदिरे । तेन
वैवातिकोपेन सपक्षः संधितस्तदा । पत्नाश्चापि सुराश्चासन भीताश्चापापिनःप्रति । असुराणां पुराण्यासन् क्षीणिणावीर्यवंतो दिवि । आयसं
राजतं चैव सौवर्णं परमं महत् । सौवर्णं कमलाक्षस्य तारकाक्षस्य राजतं । तृतीयं तु पुरं तेषां विद्युन्मालिनश्चायसं । न शक्तास्तानि मघवा
न्भेत्तुं सर्वायुधैरपि । अथ सर्वे सुरा रुद्रं जग्मुः शरणमर्दिताः । ते तमूचुर्महात्मानं सर्वे देवाः सवासवाः । ब्रह्मदत्तवरा ह्येते घोरास्त्रिपुरवा-
सिनः पीडयंत्यधिकं लोके यस्मात्ते वरदर्पिताः । त्वदृते देवदेवेश नान्यः शक्तः कथंचन । हंतुं दैत्यान्महादेव जहि तांस्त्वं सुरद्विषः । रुद्रोऽद्य
भविष्यंति पशवः सर्वकर्मसु । निपातयिष्यसे चैतानसुरान्भुवनेश्वर । स तथोक्तस्तथेत्युक्त्वा देवानां हितकाम्यया । गंधमादनविंध्यौ च
कृत्वा वंशध्वजौ हरः । पृथ्वीं ससागरवनां रथं कृत्वा तु शंकरः । अक्षं कृत्वा तु नागेंद्रं शेषं कृत्वा त्रिलोचनः । चक्रे कृत्वा तु चंद्रार्कौ देवदेवः पिना-

द्रो०
२५७

कथ्यकं अश्वरीकृत्वेलपत्रंचपुष्पदंतंचअंवकः सूर्यंकृत्वातुमलयमवनार्हेचनक्षत्रं योक्त्रांगानिवसत्वानिकृत्वाशर्वःप्रतापवा
न् वेदान्कृत्वाथचतुरश्चतुरोश्वान्महेश्वरः उपवेदानखलीनांश्चकृत्वा लोकत्रयेश्वरः गायत्रीप्रग्रहंकृत्वासावित्रींचमहेश्वरः कृत्वों
कारंप्रतोदंचब्रह्माणंचैवसारथिं गांडीवंमंदरंकृत्वागुणंकृत्वातुवासुकिं विष्णुंशरोत्तमंकृत्वाशल्यमग्निंतथैवच वायुंकृत्वाथवाजांश्चपुं
खेवैवस्वतंयमं विद्युत्कृत्वाथनिश्राणांमेरुंकृत्वाथवैध्वजं आरुह्यसरथंदिव्यंसर्वदेवमयंशिवः त्रिपुरस्यवधार्थायस्थाणुःप्रहरतां
वरः असुराणामंतकरःश्रीमानतुलविक्रमः स्तूयमानःसुरैःपार्थऋषिभिश्चतपोधनैः स्थानंमाहेश्वरंकृत्वादिव्यमप्रतिमंप्र
भुः अतिष्ठत्स्थाणुभूतःसहस्रंपरिवत्सरान् यदात्रीणिसमेतानिअंतरिक्षेपुराणिच त्रिपर्वणात्रिशल्येनतदातानिविभेदसः
पुराणिनचतंशेकुर्दानवाःप्रतिवीक्षितुं शरंकालाग्निसंयुक्तंविष्णुसोमसमायुतं पुराणिदग्धवंतंतंदेवीयाताप्रवीक्षितुं वालमंक
गतंकृत्वास्वयंपंचशिखंपुनः उमाजिज्ञासमानावैकोयमित्यब्रवीत्सुरान् असूयतश्चशक्रस्यवज्रेणप्रहरिष्यतः वाहुंसवज्रंतंतस्य १५
क्रुद्धस्यास्तंभयत्प्रभुः प्रहस्यभगवांस्तूर्णंसर्वलोकेश्वरोविभुः ततःसंस्तंभितभुजःशक्रोदेवगणैर्वृतः जगामससुरस्तूर्णंब्रह्माणं
प्रभुमव्ययं तेतंप्रणम्यशिरसाप्रोचुःप्रांजलयस्तदा किमप्यंकगतंब्रह्मन्पार्वत्याभूतमद्भुतं वालरूपधरंदृष्ट्वानास्माभिरभिल राम०
क्षितं तस्मात्त्वांप्रष्टुमिच्छामोनिर्जितायेनवैवयं अयुध्यता हिवालेनलीलयासपुरंदराः तेषांतद्वचनंश्रुत्वाब्रह्माब्रह्मविदांवरः
ध्यात्वासयंभूर्भगवान्स्तानुवाचमिततेजसः चराचरस्यजगतःप्रभुःसभगवान्हरः तस्मात्परतरंनान्यत्किंचिदस्तिमहेश्वरात् योद्द

शोस्तु मया सार्द्धं युष्माभिरमितद्युतिः सपार्वत्या कृते भावे कृतवान्बालरूपतां तं मया सहिता यूयं प्रपद्यध्वं तमेव हि सएष भगवा
न्देवः सर्वलोकेश्वरः प्रभुः न संबुबुधिरे चैवं देवास्तं भुवनेश्वरं सप्रजापतयः सर्वे बालार्कसदृशप्रभं अथाभ्येत्य ततो ब्रह्मा दृष्ट्वाच
समहेश्वरं स्वयं श्रेष्ठ इति ज्ञात्वा ववंदे तं पितामहः ब्रह्मोवाच त्वं यज्ञो भुवनस्यास्य त्वं गतिस्त्वं परायणः त्वं भवस्त्वं महादेवस्त्वं धा
मपरं मपदं त्वया सर्वमिदं व्याप्तं जगत्स्थावरजंगमं भगवन्भूतभव्येश लोकनाथ जगत्पते प्रसादं कुरु शक्रस्य त्वत्कोपाधाहितस्य
ये व्यास उवाच पद्मयोनिवचः श्रुत्वा ततः प्रीतो महेश्वरः प्रसादाभिमुखो भूत्वा अट्टहासमथाकरोत् ततः प्रसादयामासुरुमां रु
द्रं चैते सुराः अभवच्च पुनर्वायुर्यथाप्रकृतिवज्रिणः तेषां प्रसन्नो भगवान्सपत्नीको वृषध्वजः देवानां त्रिदशश्रेष्ठो दक्षयज्ञविनाश
नः सैव रुद्रः स च शिवः सोग्निः सर्वश्च सर्ववित् स चेंद्रश्चैव वायुश्च सोश्विनौ च स विद्युतः स भवः स च पर्जन्यो महादेवः सनातनः स
चंद्रमाः स चेशानः स सूर्यो वरुणश्च सः स कालः सोंतको मृत्युः स यमो रात्र्यहानि तु मासार्द्धमासा ऋतवः संध्ये संवत्सरश्च सः धाता
च स विधाता च विश्वात्मा विश्वकर्मकृत् सर्वासां देवतानां च धारयत्स वपुर्वपुः सर्वैर्देवैः स्तुतो देवः सैकधा बहुधा च सः शतधा सहस्र
धा चैव भूयः शतसहस्रधा द्वे तन्वौ तस्य देवस्य वेदज्ञा ब्राह्मणा विदुः घोरा चान्या शिवा चान्या ते तनू बहुधा पुनः घोरा तु या तनुस्तस्य सो
ग्निर्विष्णुः स भास्करः सौम्या तु पुनरेवास्य आपो ज्योतींषि चंद्रमाः वेदांगाः सोपनिषदः पुराणाध्यात्मनिश्चयाः यदत्र परमं गुह्यं

द्रो० सैवेदेवोमहेश्वरः ईदृशः समहादेवोमूर्पाश्च भगवानजः नहिसर्वेमयाशक्यावक्तुंभगवतोगुणाः अपिवर्षसहस्रेणसततंतंपा
२५८ डुनंदन सर्वेर्ग्रहैर्गृहीतान्वैसर्वपापसमन्वितान् समोचयतिसुप्रीतः शरणापः शरणागतान् आयुरारोग्यमैश्वर्यवित्तकामांश्च
पुष्कलान् सददातिमनुष्येभ्यः सचैवाक्षिपतेपुनः सेंद्रादिषुचदेवेषुतस्यैश्वर्यमुच्यते सचैवव्यापृतोलोकेमनुष्याणांशुभाशु
भे ऐश्वर्याच्चैवकामानामीश्वरश्चसउच्यते महेश्वरस्यभक्तानांमहतामीश्वरश्चसः वहुभिर्वहुधारूपैर्विश्वंव्याप्नोतिवैजगत् त
स्यदेवस्ययद्वक्त्रंसमुद्रेतदधिष्ठितं वडवामुखेतिविख्यातंपिवंस्तोयमयंहविः एषचैवश्मशानेषुदेवोवसतिनित्यशः यजंत्ये
नंजनास्तत्रवीरस्थान ईशेश्वरं अस्यदीप्तानिरूपाणिघोराणिचवहूनिच लोकेयान्यस्यकुर्वंतिमनुष्याःप्र वदंतिच नामधे
यानिलोकेषुवहून्यस्ययथार्थवत् निरुच्यंतेमहत्वाच्चविभुत्वात्कर्मभिस्तथा वेदेचास्यसमाम्नातंशतरुद्रियमुत्तमं नाम्नाचा
नंतंरुद्रेइसुपस्थानंमहात्मनः सकामानांप्रभुर्देवोयेदिव्यायेचमानुषाः सविभुः सप्रभुर्देवोविश्वंव्याप्नोतिवैमहत् ज्येष्ठंभूतंव
दंत्येनंब्राह्मणामुनयस्तथा प्रथमोह्येषदेवानांमुखादस्यानलोभवत् सर्वथायत्पशून्पातितैश्चयद्रमतेपुनः तेषामधिपति
र्यश्चतस्मात्पशुपतिःस्मृतः नित्येनब्रह्मचर्येणलिंगमस्ययदास्थितं महयत्यस्यलोकोश्चमहेश्वरइतिस्मृतः ऋषयश्चैवदेवा राम०
श्चगंधर्वाप्सरसस्तथा लिंगमस्यार्चयंतिस्मतच्चाप्यूर्द्धंसमास्थितं पूज्यमानेततस्तस्मिन्मोदतेसमहेश्वरः सुखीप्रीतश्चभवति २५८
प्रहृष्टश्चैवशंकरः यदस्यवहुधारूपंभूतभव्यभवस्थितं स्थावरंजंगमंचैववहुरूपस्ततस्मृतः एकाक्षोजाज्वलन्नास्तेसर्वतोक्षिम

योपिवा क्रोधाध्यंचाविशंल्लोकांस्तस्मात्सर्वइतिस्मृतः धूम्ररूपंचयत्तस्यधूर्जटिस्तेनचोच्यते विश्वेदेवाश्चयत्तस्मिन्विश्वरूपस्ततःस्मृतः
तिस्रोदेवीर्यदाचैवभजतेभुवनेश्वरं द्यौरपःपृथिवीचैवत्र्यंबकस्ततःस्मृतः समेधयतियन्नित्यंसर्वार्थान्सर्वकर्मसु शिवमिछ-
न्मनुष्याणांतस्मादेषशिवःस्मृतः सहस्राक्षोयुताक्षोवासर्वतोक्षिमयोपिवा यच्चविश्वंमहत्पातिमहादेवस्ततःस्मृतः महत्पूर्वंस्थि-
तोयच्चप्राणोत्पत्तिःस्थितिश्चयत् स्थितलिंगश्चयन्नित्यंतस्मात्स्थाणुरितिस्मृतः भूतंभव्यंभविष्यंचसर्वंसर्वमहेशयतः भवएषततोय-
स्माद्भूतभव्यभवोद्भवः विषमस्थःशरीरेषुसमश्चप्राणिनामिह सवायुर्विषमस्थेषुप्राणोपानःशरीरिषु पूजयेद्विग्रहंयस्तुलिंगंचापि
महात्मनः लिंगंपूजयितानित्यंमहतींश्रियमश्नुते ऊरुभ्यामर्द्धमाग्नेयंसोमार्द्धंचशिवातनुः आत्मनोर्द्धंतथाचाग्निःसोमार्द्धंपुनरु-
च्यते तैजसीमहतीदीप्तादेवेभ्योस्यशिवातनुः भास्वतीमानुषेष्वस्यतनुर्घोराग्निरुच्यते ब्रह्मचर्यंचरत्येषशिवायास्यतनुस्तथा
यास्यघोरतमामूर्तिःसर्वानत्तितयेश्वरः यन्निर्दहतियत्तीक्ष्णोयदुग्रोयत्प्रतापवान् मांसशोणितमज्जादोयत्ततोरुद्रउच्यते सूर्या
चंद्रमसोर्ल्लोकप्रकाशंतेरुचश्चयाः तेकेशसंमितास्तस्मैव्योमकेशस्ततःस्मृतः कपिःश्रेष्ठइतिप्रोक्तोधर्मश्चवृषउच्यते सदेवदेवोभगवा
न्कीर्त्यतेतोवृषाकपिः ब्रह्माणमिंद्रंवरुणंयमंधनदमेवच नि गृह्यहरतेयस्मात्तस्मात्तस्माद्धरइतिस्मृतः उन्मीलिताभ्यांनेत्राभ्यांबला
द्देवोमहेश्वरः ललाटेनेत्रमसृजत्तेनत्र्यक्षःसउच्यते एषदेवोमहादेवोयोसौपार्थतवाग्रतः संग्रामेशात्रवान्निघ्नंस्त्वयादृष्टःपिनाक
धृक् सिंधुराजवधार्थायप्रतिज्ञातेत्वयानघ कृष्णेनदर्शितःस्वप्नेयस्तुशैलेंद्रमूर्द्धनि एषवैभगवान्देवःसंग्रामेपातितेग्रतः येनदत्तानि

द्रो०
२५९

तेस्त्राणि येस्त्वया दानवा हताः धर्म्यं यशस्यमायुष्यं पुण्यं वेदैश्च संमितं देवदेवस्य ते पार्थ आख्यातं शतरुद्रियं सर्वार्थसाधनं पुण्यं सर्वकिल्वि
षनाशनं सर्वपापप्रशमनं सर्वदुःखभयापहं धर्म्यं यशस्यमायुष्यं पुण्यं वेदैश्च संमितं देवदेवस्य ते पार्थ व्याख्यातं शतरुद्रियं सर्वा
र्थसाधनं पुण्यं सर्वकिल्विषनाशनं सर्वपापप्रशमनं सर्वदुःखभयापहं चतुर्विधमिदं स्तोत्रं यः शृणोति नरः सदा विजित्य सर्वाञ्छत्रू
न्सर्वान्रुद्रलोके महीयते चरितं महात्मनो नित्यं सांग्रामिकमिदं स्मृतं पठन्वै शतरुद्रीयं शृण्वंश्च सततोत्थितः भक्तो विश्वेश्वरं देवं मा
नुषेषु तु यः सदा वरान्कामान्स लभते प्रसन्ने त्र्यंबके नरः गच्छ युध्यस्व कौंतेय न तवास्ति पराजयः यस्य मंत्री च गोप्ता च पार्श्वतस्ते ज
नार्दनः संजय उवाच एवमुक्त्वार्जुनं संख्ये पराशरसुतस्तदा जगाम भरतश्रेष्ठ यथागतमरिंदम इति श्रीमहाभारते द्रोणपर्व
णि शतरुद्रीये संजय उवाच युद्धं कृत्वा महद्घोरं पंचाहानि महाबलः ब्रा ह्मणो निहतो राजन्ब्रह्मलोकमवाप्तवान् स्वधीते यत्फ
लं वेदे तदस्मिन्नपि पर्वणि क्षत्रियाणामभीरूणां युक्तमत्र महद्यशः य इदं पठते पर्व शृणुयाद्वापि नित्यशः स मुच्यते महापापैः कृ
तैर्घोरैश्च कर्मभिः यज्ञावाप्तिर्ब्राह्मणस्य ह नित्य घोरे युद्धे क्षत्रियाणां यशश्च शेषौ वर्णौ काममिष्टं लभेते पुत्रान्पौत्रान्नित्यमि
ष्टांस्तथैव॥ ॥इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां द्रोणपर्व समाप्तं अस्यानंतरं कर्णपर्व भविष्यति यस्यायमाद्यः श्लो राम०
कः वैशंपायन उवाच ततो द्रोणे हते राजन्दुर्योधनमुखा नृपाः भृशमुद्विग्नमनसो द्रोणपुत्रमुपाद्रवन् अथ द्रोणपर्वणि वृत्तांताः २५९
आदौ द्रोणस्याभिषेकः संसप्तकवधस्ततः अभिमन्योर्वधो जिष्णोः प्रतिज्ञा सैंधवं प्रति व्यूहस्य रचना तत्र प्रवेशः सव्यसाचिनः सात्यके

द्रो०

२६०

युद्धेद्रोणस्यप्रवेशोमारुतेस्तथाजयद्रथस्यवधः पार्थेनवक्तुविस्तरः एवंप्रयुद्धंचतत्रापिराक्षसानांवृपक्षयः घटोत्कचस्यचवधोमत्स्य
पांचालयोरपि आचार्यस्यचविप्रस्यद्रोणस्यनिधनंतथाद्रौणेर्नारायणास्त्रस्यमोक्षणंतत्प्रतिक्रिया आग्नेयास्त्रस्यविन्यासस्तस्मा
त्तोघातस्यच वेदव्यासेनपार्थायकथितंशतरुद्रियंसर्वपापप्रशमनंसर्वेषामंततस्ततः अस्मिन्पर्वणिसंख्यानंकथितंतत
व बुद्धिना अत्राध्यायशतंप्रोक्तंअध्यायाः सप्ततिस्तथानवश्लोकसहस्राणितथानवशतानिच श्लोकानवतथाशीतिः संख्या
तातत्वदर्शिना द्रोणपर्वणिविप्रेभ्योभोजनंपरमार्चितंधाराश्चैवदेयाश्चैववापान्यसिवरास्तथा अश्वान्रथान्गजांश्चैववस्त्रा
स्याभरणानिच इतिवृत्तान्तः ॥ ॥४४४४४४४॥ ॥४४४४४४४॥ ॥४४४४४४४॥ ॥४४४४४४४॥ ॥छ

राम०

२६०

ॐ

द्रोणपर्वपत्र २६० [illegible]

[illegible] ॐ

द्रोणपर्वपत्र
२६०

पत्रे २५९

[illegible] २६०

पर्वडोर

~~बनारेशोदेकालापंडतेकीदिता~~

~~बाचणोबोवाका हुंसमत १७१८~~

~~बेतसु० ९४ १८ कुलहे~~

~~दितेशोदोरन~~

